00013348

21.33

Digitized with financial assistance from

H T Parekh FOUNDATION

An Initiative by HDFC

WITH YOU, RIGHT THROUGH

on 15 October, 2018

जैनविविधसाहित्यशास्त्रमाला [१]

श्रीमच्छनेश्वरमुनीश्वरविरचितं

सुरसुंदरीचरिअं ।

विद्वच्छिरोमणि-शान्तमूर्त्ति-मुनिमहाराज-श्रीमद्-
राजविजयेन टिप्पणादिभिः संस्कृत्य
संशोधितम् ।

श्रेष्ठित्रिकमचन्द्रात्मज-न्यायतीर्थ-व्याकरणतीर्थ-
पण्डित-हरगोवनदासेन प्रकाशितम् ।

वाराणस्यां
चन्द्रप्रभायन्त्रालये तत्प्रबन्धकर्त्रा मुनशी-गौरीशंकरलालेन
मुद्रितम् ।

वीरसंवत् २४४२ विक्रमसंवत् १९७२

THE ASIATIC SOCIETY OF BOMBAY
LIBRARY

Pra 891·33
Dha/Sur
13348
(13348)
9 JUN. 1952

प्रस्तावना ।

सुविदितं प्रमाणसिद्धं चेदं खल्वखिलानामपि विहितौचित्य-शास्त्रपरिशीलनानामभियुक्तमतल्लिकानां यदुत, 'भरतक्षेत्र'-इत्याख्यया वा, 'जम्बूद्वीप'-इत्यभिख्यया वा, 'आर्यावर्त'-इत्यभिधया वाऽऽर्हत-ताथागत-तदन्यसमयपरिभाषितस्य चिराय सर्वत्र विश्रुतप्रतिष्ठस्यास्य भारतवर्षस्य प्राचीनभाषासु प्राकृतभाषाप्येकतमा नाम । यद्यपि 'संस्कृत-प्राकृत-पाल्यादिषु तादृशीषूपलभ्यमानोत्पद्यमानप्राचीनार्वाचीनविविधसाहित्यग्रन्थासु का प्राचीनतरा प्राचीनतमा च ?' इति गौरवाङ्कितम्, अथ च नाना-

---

१ 'मज्झिमनिकाय'-प्रभृतीनां पिटकग्रन्थसंज्ञया प्रसिद्धानां बौद्धमूलधर्मशास्त्राणाम्, तदङ्गभूतानामितरेषां सौगतसंख्यावद्विनिर्मितानां च व्याकरण-न्यायादिविविधसाहित्यग्रन्थानां भाषाया 'पाली' इति नामधेयेन प्रख्यातत्वे, पुराणे च व्यवहारे सत्यपि प्राकृतभाषया सह यदा तौल्यपर्यवेक्षणं विदधीमहि, मागधी-शौरसेन्यादीनां वाणीनामिवावास्तवमेव भेदमालोकेमहि, वस्तुतो देश-काल-वक्त्रादिसामग्रीभेदसंजातेषद्विशेषप्रयुक्तं मागध्यादीनां प्राकृतभाषायाः संज्ञान्तरमिव (प्र० पृ० २) अस्या अपि नामान्तरत्वमेव, महावीर-शुद्धोदनसुतयोरेकदेश-कालभवत्वेन तद्भाषयोर्भेदबीजस्यैवासंभवात्, द्वयोर्धर्मग्रन्थानां भाषाया अतिसौसदृश्यस्य साक्षात्करणाच्च । २ संस्कृत-प्राकृत-पालीभाषासु प्रज्ञपण्डितगणप्रणीतं विविधविषयानुगतमनल्पीयः साहित्यमुपलभ्यमानम्, इदानीन्तनैश्चापि प्रायः सर्वमतानुयायिभिः समस्तदेशवासिभिश्च विद्वद्भिरधिकमल्पं वा संस्कृतभाषायाः साहित्यम्, पालीभाषायाश्च तत् सिंहलद्वीप-ब्रह्मदेशादिवास्तव्यैः सुगतमतानुसारिभिर्नवीनमारच्यमानमध्यक्षमीक्ष्यते । दुर्भाग्यमस्ति केवलं प्राकृतभाषाया एव, या पुरा निखिलदर्शनावलम्बिभिरखिलजनपदनिवासिभिश्च विबुधैर्विविधवर्मनैधितापि, जैनैश्चोत्तरोत्तरमधिकाधिकं तथा समादृता यथा 'प्राकृतभाषा जैनानां स्वीया भाषा' इति सार्वत्रिकविश्रुतिमाश्रितापि, इदानीमार्हतैरपीतरभाषासाहित्यवृद्धिं यथाशक्ति विदधानैरपि सर्वथा परित्यक्तसमादरा, अत एवानुत्पद्यमाननूतनसाहित्या प्रतिदिनमवहीयमानसाहित्या च वराकी वर्तत इति नेषल्लज्जाकरमेतदस्माकमर्हद्वाणीसमुपासकानाम् ।

मतभेदग्रस्तम्, अत एव विस्तरापेक्षिणं विषयं विवेचयितुं नैतदुचितं योग्यं च स्थलम्; तथापि 'प्राकृतभाषायाः सार्धवत्सरसहस्रद्वयाद् नार्वाक्तनमस्तित्वम्' इत्यत्र, यावदवगच्छामि, नास्ति मतद्वितयं मतिमताम्। न चैतदेव केवलम्, किन्त्वेतस्यां प्राकृतभाषायामेव जैनसिद्धान्तसूत्रणप्रयोजनप्रतिपादनप्रकरणे प्राक्तनैरनूचानमूर्धन्यैः

"बालस्त्रीमूढमूर्खाणां नृणां चारित्रकाङ्क्षिणाम्।
अनुग्रहार्थं तत्त्वज्ञैः सिद्धान्तः प्राकृतः कृतः॥"

इत्यादिना भूयस्तत्तद्ग्रन्थेषु निरूप्यमाणो जैनसिद्धान्तानां प्राकृतभाषाकृत एव जनसाधारणस्यासाधारण उपकारः, आर्हतेतरेषामपि प्राच्यप्रसिद्धप्रज्ञावतां नाटकग्रन्थादावपि तादृशपात्रादीनां प्राकृतभाषामयी एव वचनरचनापद्धत्यादिप्रवृत्तिश्च

---

३ अङ्गसूत्रादिपर्यायेष्वर्थतस्तीर्थकृद्भिः, शब्दतश्च तच्छिष्यमुख्यैर्गणधरपदवाच्यैर्विरचितेषु

"आचाराङ्गं सूत्रकृतं स्थानाङ्गं समवाययुक्।
पञ्चमं भगवत्यङ्गं ज्ञातधर्मकथापि च॥ २४३॥
उपासकान्तकृदनुत्तरोपपातिकाद् दशाः।
प्रश्नव्याकरणं चैव विपाकश्रुतमेव च॥ २४४॥
इत्येकादश सोपाङ्गान्यङ्गानि, द्वादशः पुनः।
दृष्टिवादो, द्वादशाङ्गी स्याद् गणिपिटकाह्वया॥ २४५॥" (A. C. II.)

इति नामसु द्वादशसु सिद्धान्तग्रन्थेषु प्रथमे एकादशापि प्राकृता एव, बाल-मूढाद्यल्पबुद्धीनामेव सत्त्वानां तदधिकारित्वात्; द्वादशश्च संस्कृतभाषामयः, अतिव्युत्पन्नमतिप्रतिपाद्यापेक्षयैव तन्निर्माणात्। ४ हेमचन्द्राचार्यप्रमुखैः, ततोऽपि प्राचीनैः प्राज्ञवर्यैश्च। ५ मुक्तेरवन्ध्यकारणतया चारित्रस्य, कारणे कार्योपचारात् तदभिलाषुकाणामिति भावः। ६ 'सर्वज्ञैः' इत्यन्यत्र पाठः। ७ (H. A. CHU. P. I)। ८ दण्डि-भामह-वररुचि-वाक्पतिप्रभृतीनाम्। ९ मृच्छकटिक-गउडवह-प्राकृतमञ्जर्यादौ। १० यद्यपि नाटकादौ स्त्री-विदूषकादीनां तादृशपात्राणां भाषा, हेमचन्द्र-चण्ड-वररुच्यादिप्रणीतप्राकृतव्याकरणनिर्दिष्टभाषानियमानामभावेन, प्राकृतभाषानुपातिनामप्यथ च शौरसेनी-मागधी-पैशाची-पाल्यादिव्यतिरिक्तव्यपदेश-(संज्ञान्तर)भाग्भाषोपदिष्टप्रयोगाणामुपलम्भेन च प्राकृतभाषातो विभेद-

'तदानीमेतस्या गिर आबालगोपालाङ्गनमनन्यः प्रचार आसीत्' इति निःसंशयमवगमयतः, भाषायास्तस्यास्तादृशप्रचाराभावे निर्दिष्टग्रन्थादिना जनसाधारणानुग्रहादिप्रयोजनस्यैवासिद्धेः। किञ्च, 'मगधदेशे भवा, तत्संबन्धिनी वेयं मागधी' इत्युपलब्ध-'मागधी'-इतिनामान्तरा प्राकृतभाषैव यथा मगधेषु देशभाषात्मना व्याह्रियमाणाऽभवत्, तथा, यदि, इदानीमाङ्गलदेश-

---

शालिनीव विभाव्यमानापि सूक्ष्मेक्षिकया समीक्ष्यमाणा न ततो व्यतिरिच्यमाना विभाति, देश-कालादिपरिवर्तनकृतस्य सर्वपदार्थानामल्पस्य महतो वा मूलरूपानुविद्धस्य परिवर्तनस्येव तदन्यतरेणैकेन केनापि रूपेण सर्वभाषास्वव्याहतप्रसरस्य भाषापरिवर्तनस्यापि नैसर्गिकतयाऽत्र सद्भावेऽपि प्राकृतत्वानुगमस्य वस्त्वभेदनियामकस्यामूलचूलमालोकनात्, ईषत्परिवर्तनेन भेदानाधायकस्य व्यपदेशान्तरस्य (नामान्तरस्य) सर्वत्रापातात्, तस्य (व्यपदेशान्तरस्य) व्यवहारसौकर्यमात्रनिबन्धनत्वात्, अत एव (व्यपदेशान्तरस्य वस्तुभेदाविधायकत्वादेव) तत्र मागध्यादौ प्राकृतत्वव्यवहारस्याप्यस्खलितमाधुनिकैस्तादितरैश्च विचक्षणैः क्रियमाणस्य कृतस्य चाभीक्ष्णमीक्षणात्, अन्यथाऽस्य कथमप्यनुपपद्यमानत्वात् 'तो डोऽनादौ"-(H. P., IV.260) इत्यादिना प्रतिपादितस्यैकैकस्या भाषाया विशेषस्याप्यत्यल्पत्वात्, तस्यापि (विशेषस्य) अन्यस्यामुपादानेऽप्रतिबन्धात्, स्वयं हेमचन्द्राचार्येण तत्रैव (प्राकृतव्याकरणे) "शेषं प्राकृतवत्" (IV. 286) "शेषं शौरसेनीवत्" (IV. 323) इत्यादिभिः, ततोऽपि व्यक्ततरमेतत्सिद्ध्याधायकेन सर्वापवादभूतेनापास्तापवादेन च "व्यत्ययश्च" (IV. 447) इति सूत्रेण, तत्र तत्र सूत्रेषु प्रदर्शितेन च "व्यत्ययात् प्राकृतेऽपि, अन्नं दाणं बोहिं" (IV. 277) "ताहँ, तुम्हाहँ" (IV. 300) इत्यादिनिदर्शनकदम्बकेनैतस्यैवाशयस्य निर्विवादमादृतत्वात्; हेमचन्द्राचार्यात् प्राचीनैर्जैनैर्जैनेतरैश्च मेधावद्भिर्निर्मितेषु नाटक-चरित्र-स्तोत्र-साहित्यादिप्राकृतग्रन्थेष्वपि प्रतिपदं तादृशप्रयोगदर्शनाच्चेत्यलमतिचर्चया। ११ जैनसिद्धान्तादिना, आदिना नाटक-स्तुत्यादिपरिग्रहः।

१२ न च कल्पनाशिल्पिकल्पितमात्रमेतत्, यद्वदिदानीमपि वस्तुतः सर्वथाऽऽङ्गलभाषैव सती 'अमरिका' (America) इतिनाम्ना सुविख्याते जनपदे तद्देशभाषारूपेण व्याह्रियमाणा तद्देशसंबन्धितया 'American Language' इति समासादितसंज्ञान्तरानुभूयते, तद्वदेतस्या अपि व्यपदे-

स्योन्नतिशालित्वेनाङ्गलभाषेव, सुविश्रुतश्रेणिका(बिम्बसार)-ऽशोकादिमहाभूपीपतिपटलस्यैतिहासिकस्थलतया सुप्रसिद्धपाटलीपुत्र (Patna) राजगृही(Rajgir)प्रभृतिराजधानीकस्य संजातमहावीर-बुद्ध-मङ्खलीपुत्रादिमहाधर्मप्रवर्तकस्य मगधदेशस्यातिगौरवितत्वेन 'इयमपि भाषा भारतवर्षस्येतरजनपदेष्वपि जनभाषारूपेण प्रचलिताऽऽसीत्' इत्यनुमिन्वीमहि, न किञ्चिद् बाधकमुपलभेमहि, प्रत्युत हस्तावलम्बदायकं संवादं चात्रासादयेमहि । स चायम्-नागरी- गौर्जरीप्रभृतीनां कालत परिवर्तितेषदीषद्रूपाणामधुनापि भारतेऽस्मिन् जनभाषारूपेण प्रचलन्तीनां प्रायो निखिलानामप्येतद्देशभाषाणां व्याकरणादिप्रमाणितं मूलं (प्राथमिकं रूपम्) प्राकृतभाषैव भवितुमर्हतीति । प्राकृत-

---

शभेदस्य सुसंभवात् । १३ केचित्तु भाषाशास्त्रिम्मन्याः संस्कृतभाषामेव सर्वासां भारतवर्षीयभाषाणां मूलम्, प्राकृतभाषां च संस्कृताज्जायमानतया द्वैतीयीकं रूपमामनन्ति, प्रमाणयन्ति च "प्रकृतिः संस्कृतम्, तत्र भवं तत आगतं वा प्राकृतम्" (H. P. I. I.) इत्यादिना स्वाभिप्रायम् । एतच्चाविचारितरमणीयम्, "प्रकृतिः संस्कृतम्"-इत्याद्यव्यवहितानन्तरमेव "संस्कृतानन्तरं च"--इत्यादिना भेदत्रितयविभक्तत्वेन प्राकृतभाषायाः, तद्विशेषस्य (प्राकृतविशेषस्य) तद्भवत्वेऽपि (संस्कृतभवत्वेऽपि) प्राकृतसामान्यस्य संस्कृतजन्यत्वाभावेन भेदत्रयघटकांशविशेषस्य प्राथमिकरूपत्वे दोषाभावात्; संस्कृतभाषातः प्राकृतभाषामवबुभुत्सूनां तद्बोधोत्पादने तादृशप्रकृतिप्रत्ययविभागस्यैव कारणिकतया संस्कृतव्याकरणानन्तरं प्राकृतोपदेशस्य च तन्निमित्ततया (तादृशप्रकृतिप्रत्ययविभागनिमित्ततया) तद्वाक्यस्य (प्रकृतिः संस्कृतमित्यादेः) स्वव्याकरणस्थतादृशसाधनक्रममात्रसूचनपरत्वात्, अन्यथा हेमचन्द्रस्यैव तीर्थकृत्सामान्योपदेशभाषाभिधानविवरणप्रसङ्ग "एकरूपापि हि भगवतोऽर्धमागधीभाषा वारिदमुक्तवारिबिन्दाश्रया-

---

१ शुद्धप्राकृतभाषायां-प्रथमाविभक्त्येकवचनरूपस्य सिप्रत्ययस्य "अत एत् सौ पुंसि मागध्याम्" (H. P. IV. 287) इति सूत्रविहितस्यैकारादेशात्मकस्य केवलस्यैकस्यैव मागधीभाषानुपातिविशिष्टनियमस्य विधानमालोक्य, अर्धशब्दं चाधमानांशवाचकमादाय (हैम० लिङ्गा० श्लो० ११) वस्तुतः शुद्धप्राकृतभाषापि सिद्धान्तभाषा तीर्थङ्करवाणीस्वरूपा प्राच्यैरभिरूपैः 'अर्धमागधी' इत्यन्वर्थेन नामान्तरेण निरूपिता; तथा चोक्तसूत्रवृत्तौ स एव ग्रन्थकारः—"यदपि

भाषाया अस्याः साहित्यभाण्डागारस्तदानीं तदानीन्तनैरार्हतैस्तदपरैश्च विद्वद्भिः, विना स्वस्वमताग्रहकौटिल्यम्, अहमहमिकया सर्वतोभावेन वृद्धिमुपनीयमानस्तादृशीं विस्तीर्णतामुपेयिवान् यत्, अनेकशो नैकैरनार्यनरनाथापशदाविर्निर्मितैर्दुर्दैवादिविलसितैश्चाहरहरधिकाधिकमुपतिष्ठमानैर्विविधोपद्रवैर्भृशमप्रचेचीयमानोऽपीदानीं यावद् नानाविषयकाणि विचक्षणचित्तचमत्कारकारकाणीतरभाषासाहित्यासुलभानि साहित्यजगति नवीनप्रकाशमादधानानि आधास्यमानानि च ग्रन्थरत्नान्युपदीकरोतीत्ययमपि तद्व्यतिरेकेणानुपपद्यमानः प्रकृतसिद्धौ सिद्धहस्ततामाकलयति । अद्य पाठकवर्याणामुपदीक्रियमाणमिदं सुरसुन्दरीचरितमपि तस्यैव भाण्डागारस्य ग्रन्थरत्नानामेकतमद् रत्नम् ।

विनिर्माताऽस्य ग्रन्थस्य श्रीमान् धनेश्वराभिधानः साधुपुङ्गव आसीदिति स्वयं ग्रन्थकर्ता प्रतिपरिच्छेदप्रान्तेमार्यामेकामुपन्यस्यमानः प्रत्यपीपदत् । धनेश्वरनामानश्च बहवो ग्रन्थकारा भिन्नभिन्नगच्छसत्तासमयाः स्मर्यन्ते, येषु;—

१ शत्रुञ्जयमाहात्म्याभिधस्य ग्रन्थस्य प्रणेता प्रथमः, येन

नुरूपतया परिणमति, यदाह;—

"देवा दैवीं नरा नारीं शबराश्चापि शाबरीम् ।
तिर्यञ्चोऽपि हि तैरश्चीं मेनिरे भगवद्गिरम् ॥"

न ह्येवंविधभुवनाद्भुतातिशयमन्तरेण युगपदनेकसत्त्वोपकारः शक्यः कर्तुम्" (H. A. CHUDA. P. 2) इति वचनविरोधप्रसङ्गात्, अनादिप्रवाहरूपतया संजायमानानां तीर्थकृतामनादित्वेन तदुपदेशवाण्याः प्राकृतरूपाया अप्युत्पत्तिविरोधात्, संस्कृतपश्चाद्वर्तित्वाङ्गीकारे बलादापततः सादित्वस्य कथमप्यघटनादिति ।

१४ सा चेयम्—

साहु-धणेसर-विरइय-सुबोह-गाहा-समूह-रम्माए ।
रागरिग-दोस-विसहर-पसमण-जल-मंतभूयाए ॥ २४९ ॥"

"पोराणमद्धमागहभासानिययं हवइ सुत्तं ।"

इत्यादिनाऽर्षस्यार्धमागधभाषानियतत्वमाम्नायि, तदपि प्रायोऽस्यैव (एतस्यैव विशेषनियमस्य IV. 287) विधानात्, न वक्ष्यमाणलक्षणस्य (प्रोक्तसूत्राभःप्रतिपादितस्यान्यस्य मागधीभाषाविशेषनियमनिकरस्य)" इति ।

सौराष्ट्रदेशान्तर्गतवलभीपुर (वला vala, near Bhavnagar, in Kathiawar) राजस्य शिलादित्यनाम्नः कृते ग्रन्थोऽयं निरमायि, इति शिलादित्यसंज्ञाकाल एवास्यापि समयः, वलभीपुरभङ्गनान्तरीयकश्च शिलादित्यसमयः, तद्राज्यकालान्त एव वलभीपुरभङ्गात्, वलभीनाशसमयश्च प्राक्तनानामाधुनिकानां च विदुषां नानामतभेदग्रस्तत्वेनाद्यापि विवादापन्न एव, केवलं श्रूयमाणेषु सर्वेषु धनेश्वरसूरिष्वयं प्राचीनतम इत्यविवादं शक्यमभिधातुम्, इतः प्राचीनस्यैतन्नाम्नोऽपरस्य ग्रन्थकर्तुरद्यपर्यन्तं श्रुतिपथानवतारात्।

२ वादमहार्णवं सम्मतितर्कस्य तत्त्वबोधविधायिनीमतिमहतीं न्यायगभीरां टीकां च विनिर्मातुस्तर्कारण्यानीशार्दूलविरुदस्य राजगच्छगगनाङ्गणदिनमणेः श्रीमदभयदेवसूरेः शिष्यः, विक्रमात् १२४६ तमे वर्षे काव्यप्रकाशसंकेतकर्तुः श्रीमाणिक्यचन्द्रसूरेरष्टमः पट्टगुरुश्चैको धनेश्वरसूरिः। अस्य सत्तासमयो विक्र-

---

१५ प्रबन्धामृतदीर्घिकाद्यभिप्रायेण; इतरेषामत्रापि मतपार्थक्यात्।

१६ श्रीराजशेखरसूरिभिः

"विक्रमादित्यभूपालात् पञ्चर्षित्रिकवत्सरे।
जातोऽयं वलभीभङ्गो ज्ञानिनः प्रथमं ययुः॥"

इति श्लोकेन सं० ३७५रूपस्य विक्रमस्य चतुर्थ्याः शत्या अन्त्यभागस्य तस्य (वलभीभङ्गसमयस्य) विनिर्देशात्; एतदनुसृत्य तपागच्छपट्टावल्यामस्मत्परमगुरु-न्यायाम्भोनिधिश्रीमद्विजयानन्दसूरीश्वरैश्चापि वीरनिर्वाणान्नवम्याः शताब्द्या मध्यभागस्य ८४५ रूपस्य (विक्रमात् ३७५) समुल्लेखात् (see Jaina Tattvadarsha p. 334); अन्यैश्च पञ्चम्या अपि विक्रमाब्द्या अन्तिमभागस्य ४७५रूपस्याभिधानात् (See Jaina Dharma Prachina Itihasa Part II. P. 144); अपरैस्ततोऽपि भिन्नस्य तस्य विकल्पनाच्च।

१७ यदाह स्वयं ग्रन्थकारस्तद्ग्रन्थप्रान्ते—

"रस-वक्त्र-ग्रहाधीशवत्सरे मासि माधवे।
काव्ये काव्यप्रकाशस्य संकेतोऽयं समर्थितः॥ १२॥"

यत्तु काव्यप्रकाशटीकाकर्त्रा भट्टवामनाचार्येण स्वग्रन्थप्रस्तावनायामेतच्छ्लोकस्थवक्त्रशब्देनैकसंख्यामादाय काव्यप्रकाशसंकेतनिर्माणकालो विक्रमात् १२१६ पृ० २७) खृष्ट ११६० (पृ० ६) इति प्रोक्तम्; तच्चिन्त्यम्,

र्भीयैकादशशताब्दौ। एनं श्रीमुञ्जनामा धरार्धीशो निजगुरुरूपतयाऽङ्गयकार्षीत्, सदकार्षीच्चैत्यादि श्रीमाणिक्यचन्द्रसूरिकृतप्रशस्त्युल्लेखे स्पष्टम्।

३ विशावलगच्छीयः श्रीधनेश्वरसूरिरपरः, अस्य सत्ताकालो विक्रमीया द्वादशी शती, श्रीजिनवल्लभसूरिकृतस्य सूक्ष्मार्थविचारसारापरपर्यायस्य सार्धशतकनामधेयस्य ग्रन्थस्य चतुःश्लोकसहस्रमितायाः वृत्तेरनेन विक्रमात् ११७१ तमे संवत्सरे प्रणयनस्य स्वयं तत्रोक्तत्वात्।

४ चन्द्रगच्छाधिपतिः, मधुम्नसूरिशिष्यस्य श्रीचन्द्रप्रभसूरेः शिष्यो धनेश्वरसूरिरन्यतमः, 'यस्य वीरभद्र-देवसूरि-देवभद्रवाचक-देवेन्द्रसूरयश्चेति चत्वारः शिष्याः समजनिषत'-इति श्रीबालचन्द्रकविकृतोपदेशकन्दलीवृत्तिप्रशस्तौ[1] दर्शनादस्य विद्यमानतासमयो विक्रमस्य द्वादशशताब्द्या अन्तिमः, त्रयोदश्या वा तस्या अग्रिमोंऽशः शक्यो विनिश्चेतुम्, बालचन्द्रकवेरुपदेशकन्दलीकारासडकविशिष्यत्वात्, आसडकवेश्चास्य प्रस्तुतस्य सूरेः प्रशिष्यशिष्यत्वात्, विवेकमञ्जर्याश्चासडकविना विक्रमात् १२४८ तमे वत्सरे विनिर्माणभणनात्। गुर्वावल्यामपि

"अथ चैत्रपुरे वीरप्रतिष्ठाकृद् धनेश्वरः।
चान्द्रगच्छेऽभवत् सूरिस्तस्माच्चैत्रगणोऽभवत्॥ ८४॥"[2]

अनेनैव ग्रन्थकर्त्रा पार्श्वनाथचरित्रस्य विक्रमात् १२७६ तमेऽब्दे निर्माणात्, एकान्यग्रन्थविरचने तावतः कालान्तरस्यासंभवाभावेऽपि दुःसंभवस्य निरोद्धुमशक्यत्वात्, ब्रह्ममुखचातुर्विध्यतया वक्त्रशब्देन चतुरङ्कोपादानस्यैव बहुप्रसिद्धत्वात्, तथाप्रयोगस्यान्यत्रानेकशो दृष्टत्वाच्चेति।

१८ See Peterson Report 5 th. । १९ श्रीमन्मुनिसुन्दरसूरिप्रणीतायाम्। २० एकस्यैव गच्छस्य 'चन्द्रगच्छ'-'तपागच्छ'-इत्यादीनि निमित्तविशेषमासाद्योदितानि नामान्तराणि, यद् गुर्वावल्यामेव

"श्रीचन्द्रगच्छोऽथ बृहद्गणश्च तपागणश्चेत्यधुना स वाच्यः।
चान्द्रं कुलं कोटिकनाम्नि गच्छे वाज्री च शाखेति पुरा प्रसिद्धिः॥ ९८॥"

---

[1] यदाह स्वयं तस्यैव ग्रन्थस्य प्रशस्तौ—

"रसर्षिरविसंख्यायां समायां दीपपर्वणि।
समर्थितमिदं वेलाकूले श्रीदेवकूपके॥" इति।

इत्यादिना वर्णितः श्रीधनेश्वरसूरिरप्यस्मादभिन्न एव प्रतीयते, यस्य देवभद्रवाचकनामाऽत्र, उपदेशकन्दलीवृत्तिप्रशस्तौ च विनिर्दिष्टः शिष्यः, पट्टावल्यादिविनिर्णीतविक्रमीयत्रयोदशाब्दीसत्तासमयं श्रीमज्जगच्चन्द्रसूरिं शिथिलीभूतनिजतपागच्छोद्धारे तच्छिष्यीभूय[२१] भूयः साहाय्यमर्पितवान्।

५ शीलभद्रसूरेः सब्रह्मचारी, श्रीचन्द्रसूरेः सामाचार्यादिग्रन्थप्रणेतुर्गुरुरप्येक एतन्नामा सूरिधूर्यः "सामाचारी[२२] सुबोधा सर्वानुष्ठानगोचरा धनेश्वरशिष्यश्रीचन्द्रीया" इति बृहट्टिपनिकोल्लेखात्। अयमपि विक्रमीयत्रयोदशशताब्द्यां विद्यमानसत्ताकः, श्रीचन्द्रसूरिणा पञ्चोपाङ्गवृत्तेर्वैक्रमे १२२८ तमे परिवत्सरे विनिर्माणात्[२३]।

६ नागेन्द्रगच्छीयः, श्रीवासुपूज्यचरित्रग्रन्थकर्तुः वर्धमानसूरेः प्रगुरुः, चन्द्रप्रभचरित्रप्रणेतुर्देवेन्द्राचार्यस्य[२४] गुरुश्चाप्यन्यतमः श्रीधनेश्वराचार्यः; यद् वासुपूज्यचरित्रप्रशस्तौ;—

"श्रीमान् धनेश्वरः सूरिरथाजनि मुनिप्रभुः।
रूपे वयसि च प्राप जयपत्रं जनेषु यः॥ ४॥"

अस्यापि सत्ताकाल उपरितनसमानस्त्रयोदशशतीरूप एव, देवेन्द्राचार्येण चन्द्रप्रभचरित्रस्य विक्रमात् १२६४ वत्सरे संदर्भात्[२५]; वर्धमानसूरिविहितस्य[२६] वासुपूज्यचरित्रस्य च विक्रमाद्

---

२१ तच्छब्दोऽत्र जगच्चन्द्रसूरिं परामृशति; यदुक्तं गुर्वावल्यां—

"देवभद्रगणीन्द्रोऽपि संविग्नः सपरिच्छदः।
गणेन्द्रं श्रीजगच्चन्द्रमेव भेजे गुरुं तदा॥ ७०३॥"

२२ Jaina Granthavali p. 157। २३ Jaina Granthavali p. 10

२४ यदाह ग्रन्थकार एव तत्प्रशस्तौ;—

"श्रीधनेशपदे सूरिर्देवेन्द्राख्यः स्वभक्तितः।
पुण्याय चरितं चक्रे श्रीमच्चन्द्रप्रभप्रभोः॥"

२५ (Peterson Report IV. P. 84–85)। २६ यत्तु विक्रमीयैकादशशताब्द्यां विद्यमानसत्ताकस्य वर्धमानसूरेर्वासुपूज्यचरितप्रणेतृत्वेन पण्डितहीरालालस्य कथनम् (Jaina Dharma Prachina Itihasa Part 1 p. 119) तदयुक्तम्, ग्रन्थकर्त्रा प्रशस्तौ स्वयमुपरिनिर्दिष्टसमय एव स्वग्रन्थ-

नवाङ्करविप्रमितस्य (१२९९) विनिर्माणकालस्य विनिर्णयादिति।

अयं प्रस्तुतग्रन्थकर्ता च सर्वेभ्योऽप्येतेभ्यो धनेश्वरनामभ्यो विद्वद्भ्यो व्यतिरिक्त एव, प्रायः समस्तेभ्योऽप्यस्य भिन्नसत्ताकालत्वात्, निखिलानामप्येतेषामाचार्यापरपर्यायसूरिपदविभूषितत्वात्, अस्य च मुन्यादिशब्दवाच्यसाधुपदसंस्थितत्वात्, "साहु-धणेसर-विरइय"-इत्यादिना निखिलपरिच्छेदान्ते "तेसिं सीसवरो धणेसरमुणी" इत्यादिनाऽन्त्यपरिच्छेदावसाने च स्वयं ग्रन्थकृता स्वस्य साधुपदवर्तित्वभणनात्, साधु-

---

निर्मितेर्निम्नोद्धृतेन श्लोकेन प्रतिपादनात्; तत् (पण्डितहीरालाल)-प्रोक्ताद् वर्धमानसूरेर्गुर्वाद्यभिधानतः, सत्तासमयतश्चैतद्ग्रन्थनिर्दिष्टयोस्तयोर्भिन्नत्वेन प्रस्तुतग्रन्थकारस्य तदुक्तसूरिव्यतिरिक्तताया: स्पष्टं प्रतीयमानत्वाच्च। २७ एतस्य ग्रन्थकारस्यैव

"ततोऽसौ निधि-निध्यऽर्कसंख्ये (१२९९) विक्रमवत्सरे।
आचार्यश्चरितं चक्रे वासुपूज्यविभोरिदम् ॥ २८ ॥"

इत्यनेन प्रशस्तिगतश्लोकेन। २८ न च सूरिपदस्य साधुपदतो गौरवार्हत्वेन स्वयं स्वश्लाघाकरणस्य महतामनधिकृतत्वेन च ग्रन्थकृता स्वस्य विद्यमानत्वेऽपि तदानीं सूरित्वे, इदानींतनानामपि कतिपयानामिव स्वयं सूरिपदोल्लेखो न विहितः स्यादिति शक्यमभिधातुम्; पूर्वकाले साधुभ्य उपाध्यायपदादप्यतिशायिनः, धैर्यवैदुष्यसमयसूचकत्वाद्यनन्यगुणापेक्षिणीं योग्यतां प्रतीत्यैव तीर्थकरेणापि नमस्करणीयेन चतुर्विधसंघेन सूरिपदस्य महासम्मानपूर्वकं वितरणात्, तदुल्लेखस्य तादृशमहामान्यसंघप्रसाधितनिजकर्तव्ययोग्यतासंदर्शनमात्रे तात्पर्यात्, वस्तुतस्तेन (सूरिपदोल्लेखेन) समुचितसत्कारविधायिनः श्रीसंघस्यैव शोभाधानात् स्वयं तदुल्लेखस्यात्यावश्यकत्वात्; अत एव हरिभद्र-हेमचन्द्राचार्यप्रभृतीनां महाचार्याणामपि विना संकोचं प्रायः सर्वत्र सूर्युपपदत्वेनैव स्वनामोल्लेखस्यालोकनात्। आधुनिकानां तु सूरिमानिनां कतिपयानामल्पाश्रमसाध्यमहादम्भपरिशीलनविहितकतिचिन्निजान्धभक्तजनजनितप्रच्छन्नप्रद्युम्न-पुंस्तकादिव्ययपरितोषितान्यदर्शनानुयायिकतिचिल्लुब्धपण्डितेभ्य आचार्यपदव्युपादानस्येव तदानींन्तनानां तेषां तस्याग्रहणात्, पूर्वकाले दायकोपादायकयोर्द्वयोरपि शुद्धत्वात्। अत एवाचार्यपदादप्यतुष्यतां ततोऽप्यधिकाक्षरं हनूमल्लम्बपुच्छमिव सुदीर्घं पदवीमात्तवतामप्यद्यतनानां श्रीसंघकृतस्य तदंशभूतोपासकगणविहितस्य वा तादृशस्य संम्मानस्यास्तां कथा, आदराभावस्य, ततोऽपि विशिष्याऽक-

सूरिपदयोः पूर्वापरभावेन भिन्नत्वात्, सूरिपदावच्छिन्नेन सर्वेणापि स्वयं स्वस्य सूर्युपपदत्वेन स्वनामोल्लेखस्यार्हतानामाम्नायात्, साधुत्व-सूरित्वावस्थावर्तिनाम्नोश्च प्रायस्तदानीं परिवर्तनैकतभेदस्योपलम्भेनाप्युपर्युक्तेषु धनेश्वरनामसु सूरिष्वस्य प्रस्तुतग्रन्थविरचनात् पश्चात्काले सूरिपदवीभवनं परिकल्प्यापि परिगणयितुं दुःशकत्वाच्च।

स्वनामनिर्देशव्यतिरिक्तस्य संक्षिप्तस्य स्ववंशपारम्पर्यस्य ग्रन्थविरचनासमय-स्थलादिगर्भस्य भविष्यज्जनसमूहस्यात्यन्तमुपयुक्तस्य निजसत्तासमयप्रभृतीतिवृत्तोचितवृत्तान्तस्य चोपनिबन्धाय प्रचुरैः प्राच्यैरन्यैर्ग्रन्थकर्तृभिः केनाप्यौदासीन्यादिकारणेन प्रायोऽगृहीतमायासमुपाददता प्रस्तुतेन ग्रन्थकर्त्रा कियताप्यंशेन सत्यमनुगृहीता इतिहासरसिकाः।

थनीयतिरस्कारस्याप्यध्यक्षमीक्षितत्वादीक्ष्यमाणत्वाच्च; इत एव कारणादिदानीं ह्रियेव स्वहस्तेन क्वापि स्वपदोल्लेखमकुर्वन्तो बकवृत्तिमेवाधिश्रयन्तस्ते दृश्यन्ते, निजभक्तैरेव तद्विज्ञापनोद्घोषणादेर्दर्शनात्, इत्येतादृशामधुनातनमहात्मनां (!) केषांचित् स्वयं सूरिपदानुल्लेखं निध्याय तत्कारणं च तैः कापट्येन दर्श्यमानं स्वश्लाघापातकादिकं श्रद्धाय तद्विलक्षणप्रवृत्तिषु पूर्वतनेषु तद्विकल्पनस्य सर्वथानुचितत्वादिति सूतमत्राधिकेन।

२९ मुनिपदवर्तित्वे धनेश्वरनाम्नः प्रस्तुतग्रन्थकर्तुरपि सूरिपदावस्थायां पूर्वनामपरिवर्तनेन गुरुभिः "जिनभद्र-"इति विहितं नामधेयं विभाव्यते (See Jaina Dharma Prachina Itihasa Part I, P. 37) श्रीजिनेश्वरसूरि-बुद्धिसागराचार्ययोर्बहुशिष्येष्वपि श्रीजिनचन्द्र-अभयदेव-जिनभद्रसूरीणामतिप्रसिद्धि-साहचर्यादिभाक्त्वात्, श्रीमदभयदेवसूरिणाप्यत्र

"तयोरेव विनेयानां तत्पदं चानुकुर्वताम्।
श्रीमतां जिनचन्द्राख्यसत्प्रभूणां नियोगतः॥ ६॥
श्रीमज्जिनेश्वराचार्यशिष्याणां गुणशालिनाम्।
जिनभद्रमुनीन्द्राणामस्माकं चाऽहिसेविनः॥ ७॥"

इत्यनेन भगवतीसूत्रवृत्तिप्रशस्तिप्रोक्तस्य संवादस्यासादनात्; सुरसुन्दरीकथायाश्चोक्तसूरित्रयेऽप्येतद्व्यतिरिक्तेनान्येन विधानस्याद्यावध्यश्रवणात्, जिनभद्रसूरिकृतत्वेन तस्या उल्लेखस्यालोकनाच्च (See Jaina Dharma Prachina Itihasa Part I, P. 37)।

तत्र स्ववंशपारम्पर्यं प्रान्त्यपरिच्छेदपरिसमाप्तौ ग्रन्थकृता ग्रन्थस्य पद्यमयतया पुराणपद्धत्यनुरोधेन गाथाबद्धमेव निर्दिष्टम् अथ च पाठकसुखावबोधाय वंशवृक्षरूपेण तदिहोल्लेखितुमुचितमुत्पश्यामि; —



एतस्मिन् स्वगुरुपर्वक्रमे प्रभवस्वामि-वज्रस्वामिनोः, वज्रस्वामि-जिनेश्वराचार्ययोश्चान्तरालेऽनुक्रमं तत्पट्टधराणां शय्यंभवसूरि-वज्रसेनसूर्यादीनां भूरीणां संजातत्वमातिप्रसिद्धम्। तच्च, ग्रन्थकारेणापि तत एव (प्रसिद्धत्वादेव), स्थलाभावतः, समासतो निर्देशस्याभिधित्सातो वा कारणाद् व्यासरूपेण तान् सर्वान् सूरिवर्यानानिर्वर्ण्य

" सीसो तस्स सुहम्मो तत्तो जम्बू तओ य पभवोत्ति।
एवं सूरीण परंपराए ता जाव वइरोत्ति ॥ २३८ ॥
साहाए तस्स सूरी जिणेसरो नाम आसि विक्खाओ।
तत्तो य निम्मलगुणो उज्झाओ अल्लओ नाम ॥ २३९ ॥ "

इति गाथास्थितैः 'एवं सूरीण परंपराए, 'साहाए तस्स सूरी" इत्येतत्सामान्याभिधायिभिरेव शब्दैरुपदेशि[३०]।

'उज्झाओ अल्लओ' इत्येवमत्र निर्दिष्टम् 'अल्लक-'इत्यभिधानं, वर्धमानसूरि-सर्वदेवसूर्यादिभूरिसूरिशिष्यकस्य 'उद्द्योतनसूरि-'[३१] इतिनाम्ना सर्वत्र गुर्वावल्यादाविति वृत्तग्रन्थसार्थे विश्रुतस्य सूरिवर्यस्यान्वर्थायां पदवीरूपायां वोपाध्यायावस्थायां विभाव्यते, वर्धमानसूरेस्तस्यैव[३२] शिष्यत्वेन सर्वत्रोपलभ्यमानस्योल्लेखस्यान्यथा कथमप्यनुपपद्यमानत्वात्, प्रस्तुतग्रन्थकारेणास्य सूरेर्नाम 'उद्द्योतनसूरि-' इत्यनुल्लिख्य 'अल्लकोपाध्याय-' इत्यभिधानस्योपन्यासे चानन्यकारणस्य सद्भावात्, समानकालिकत्वेनोपाध्यायतया तदतिप्रसिद्धेः[३३] साक्षात्करणस्य तत्त्वात् (अनन्यकारणत्वात्), अस्यैतद्रूपेण (उपाध्यायतया) प्रसिद्धेः प्रसाधकस्य संवादस्याप्युपलम्भात्, तथा च पट्टावल्याम्:—

---

३० अत एवात्र वंशवृक्षेऽपि तदनुसारिणि तथैवोपान्यासि। तदिति-वृत्तमपि स्थविरावली-परिशिष्टपर्वादिग्रन्थनिबद्धमतिप्रसिद्धमिति तज्जिज्ञासवस्तद्विलोकनाय विज्ञप्यन्ते। येषां तु तदधोवर्तिनामल्लकोपाध्यायप्रभृतीनां यावद् ग्रन्थकृद्गुरूणां वृत्तं न तादृशीं प्रसिद्धिमश्नुवानम्, तत्, यच्च यावच्चोपालप्सि, यथास्थलमग्रेऽनुक्रममुपन्यास्थम्।

31 Munisundarsuri's gurvalee, Shloka 45—54.

३२ उद्द्योतनसूरेस्तच्छब्देन परामर्शः; 'वर्धमानसूरिः पूर्वं चैत्यवास्यवस्थायां श्रीजिनचन्द्रसूरेः शिष्य आसीत्' इत्यादिवृत्तान्तेनानन्तरमेव वक्ष्यमाणेन तस्यान्यशिष्यत्वेऽपि, अत्र शुद्धावस्थाया एव विवक्षिततयैवकारस्यान्यव्यवच्छेदपरत्वमदुष्टम्।

३३ अस्मत्सुहृद्वाराणसेयमण्डलाचार्यश्रीनेमिचन्द्रसूरेः संबन्धिनि खरतरगच्छपट्टावल्यादर्शपुस्तके, यत् तैर्वितीर्यं मृशमुपकृतोऽहमत्र, पत्र० ५ पृ० १; जैनधर्मेतिहासप्रथमभागे पृ० १२९।

३४ न्यायाम्भोनिधेरस्मत्परमगुरोराचार्यपदसमये संजातस्य 'श्रीविजयानन्दसूरि-' इत्यभिधानस्यापेक्षया साधुत्वदशावृत्ति 'आत्माराम-' इत्यभिधानं सर्वैः स्वीयैः परकीयैश्चाधिकरूपेण तत्र तत्रोल्लिख्यते, मुन्यवस्थायामेव प्रज्ञा-ज्ञान धैर्य-साहसौदार्यत्वाद्यसाधारणगुणशालित्वेन समस्तेऽपि जगति प्रसिद्धीभवनात्।

"तत्पट्टे श्रीउद्द्योतनसूरिः, अस्माच्चतुरशीतिगच्छस्थापना जाता" तत्स्वरूपं यथा; एकदा श्रीउद्द्योतनसूरिं महाविद्वांसं शुद्धक्रियापात्रं च विज्ञायापरेषां व्यशीति ८३ संख्यानां स्थविराणां व्यशीतिः शिष्याः पठनार्थं समागताः, तान् श्रीगुरुः सद्रीत्या पाठयति स्म। तस्मिन्नवसरे..."

इति स्पष्टमुल्लेखात्, अस्मत्परमगुरोर्विजयानन्दसूरिवर्यस्यापि तथाव्यवहारस्यात्र निदर्शनभूतत्वात्, उपाध्यायादिपूर्वावस्थावर्तिनाम्नः सूरिपदसमये यथागुर्विच्छं परावर्तनस्यापि बहुशो दर्शनात्[३५]; गुर्वावल्यादावुद्द्योतनसूरेरुपाध्यायसमयवर्ति-'अल्लक-' नामोल्लेखानासादने गुर्वावल्यादौ सूरिपदप्राग्वृत्त्यन्यवृत्तान्तानुल्लेखस्यैव बीजत्वात्, उपाध्यायदशावृत्तिनामोल्लेखस्य च तन्नान्तरीयकत्वात् (सूरिपदप्राग्वर्त्यन्यवृत्तान्तोल्लेखनान्तरीयकत्वात्)। उद्द्योतनसूरेश्चान्यत्र सर्वत्रेतिहासग्रन्थसमुदायेऽद्ययावदस्माभिरासादितं वृत्तं, तपागच्छीयपट्टावल्यभिप्रायेण

'विमलचन्द्रसूरिपट्टधरः सूरिरयमेकदा विक्रमात् ९९४ संख्याके संवत्सरे पूर्वदेशात् श्रीअर्बुदाचले (Mount Abu) यात्राकृते गच्छंस्तदुपत्यकास्थस्य 'टेली'नाम्नो ग्रामस्य सीम्नि स्थितस्यैकस्य बृहतो वटवृक्षस्य तलमाश्रयमाणः श्रेष्ठमुहूर्तमवबुध्य 'वटस्येवास्य सौवस्य कुलस्यापि वृद्धिः स्तात्' इति निजपट्टेऽष्टावाचार्यान्, मतान्तरेणैकं वा तमस्थापयत्। ततः प्रभृति च पश्चात्संजाततपागच्छनाम्नो गच्छस्य 'वृद्धगच्छ-' इति, मतभे-

---

३५ उपाध्यायावस्थावृत्ति-'धर्मकीर्ति-'इत्यादिनामधेयस्य धर्मघोषसूर्यादेः

" शिष्योऽथ देवेन्द्रगुरोर्द्वितीयकः श्रीधर्मघोषः सुकृताब्धिपोषकः ।
घोषं नयन्नन्ययशः सरस्वतीयोगान् बभौ पल्लवयन् वसन्तवत् ॥१७३॥
दैवात् त्रयोदशदिनान्तरतो गते स्वः शैल-द्वि-विश्वशरदि स्वगुरुद्वयेऽपि ।
यो वाचकोऽधिगतसूरिपदः स्वगोत्रिसूरेर्जघान किल मत्सरिणां कदाशाः॥१७४॥
स च श्रीधर्मकीर्त्याह्वः श्रीविद्यानन्दबान्धवः ।
जित्वा मत्सरिणः शक्त्या भविश्वाब्देऽभवद् गणी ॥ १७५ ॥"

इत्यादिना गुर्वावल्यादौ तथोक्तेः ।

देन 'वटगच्छ-' इति वा नाम संजातम्[३६]' इत्यत्र;

खरतरगच्छीयतदभिसंधिना पुनः

'श्रीनेमिचन्द्रसूरिपट्टभृत् सूरिरयं मालवदेशात् श्रीशत्रुञ्जयती-र्थमभिवन्दितुकामो विहरन् स्वशिष्यभूतांश्चतुरशीतिगच्छोत्पाद-कांस्तावत आचार्यान् मन्त्रशक्तिविशेषेण समर्थीकृत्य निजं चायुः स्वल्पमधिगम्य वर्त्मन्येवानशनं विधाय दिवमशिश्रियत्[३७] * इत्येतावन्मात्रे च पर्यवस्यति ।

---

३६ यदाहुर्गुर्वावल्यां मुनिसुन्दरसूरयः;-

" तत्पट्टभूषाकृदभूद् मुनीनां त्रिभिः शतैः सेव्यपदः सदापि ।
उद्द्योतनः सूरिरवद्यहीनविद्यानदीविश्रमसिन्धुनाथः ॥ ४५ ॥
समस्त्यथो शैलकुलावचूलः श्रीअर्बुदस्तीर्थपवित्रितात्मा ।
नानापुरग्रामतटाकवापीधुनीवनभ्राजिततुङ्गमौलिः ॥ ४६ ॥[1]

* * * * * *

चतुर्नवत्याऽभ्यधिकैः शरच्छतैः श्रीविक्रमार्कांद् नवभिः स सूरिराट् ।
पूर्वावनीतो विहरन्नथागमद् यात्राकृते तस्य गिरेरुपत्यकाम् ॥ ५३ ॥

देलीखेटकसीमसंस्थितवटस्याधः पृथोस्तत्र स
प्राप्तः श्रेष्ठतमं मुहूर्तमतुलं ज्ञात्वा तदाऽतिष्ठिपत् ।
सूरीन् सौवकुलोदयाय भगवानष्टौ, जगुस्त्वेककं
केचित्, वृद्धगणोऽभवद् वटगणाभिधस्तदादि त्वयम् ॥ ५४ ॥
न्यग्रोधगच्छेऽथ बभूव तस्मिन् श्रीसर्वदेवः प्रथमो मुनीन्द्रः ।"

३७ यत् खरतरगच्छपट्टावल्याम्;-"अथ श्रीउद्द्योतनसूरिस्त्र्यशीति-शिष्यपरिवृतो मालवकदेशात् संघेन सार्धं शत्रुञ्जये गत्वा ऋषभेश्वरमभि-वन्द्य पश्चाद् वलमानो रात्रौ सिद्धवटस्याधोभागे स्थितः । यत्र मध्यरात्र-समये आकाशे रोहिणीशकटमध्ये बृहस्पतिप्रवेशं विलोक्यैवमुक्तवान्,— ' सांप्रतं तादृशी वेला विद्यते, यतो यस्य मस्तके हस्तः क्रियते स प्रसिद्धि-मान् भवति 'इति। अथैतत् श्रुत्वा त्र्यशीत्यापि शिष्यैरुक्तम्,-' स्वामिन् ! वयं भवतां शिष्याः स्मः, यूयमस्माकं विद्यागुरवः ; ततोऽस्मदुपरि कृपां विधाय हस्तः क्रियताम् ।' ततो गुरुभिरुक्तम्,—' वासचूर्णमानीयताम् ।' तदा तैः शिष्यैः काष्ठच्छगणादिचूर्णं कृत्वा गुरुभ्य आनीय दत्तम् । गुरुभिरपि तच्चूर्णं मन्त्रयित्वा त्र्यशीतेः शिष्याणां मस्तके निक्षिप्तम् । ततः प्रभाते श्रीगुरुभिः स्वस्यालपायुर्ज्ञात्वा तत्रैवानशनं कृत्वा स्वर्गतिः प्राप्ता । अथ ते

---

१ इतः श्लोकषट्कमर्बुदाचलवर्णनपरमित्युपयुक्तत्वाभावेनात्र नोदधारि ।

अल्लकोपाध्यायस्य (श्रीउद्द्योतनसूरेः) पट्टभृत्त्वेनात्रोपदिष्टस्य श्रीवर्धमानसूरेः खरतरगच्छपट्टावल्यां खण्डश उल्लिखितोऽयं वृत्तान्तलेशः ;—

"तस्मिन्नवसरेऽम्भोहरदेशे स्थविरमण्डल्यां वृद्धस्य जिनचन्द्राचार्यस्य चैत्यवासिनः शिष्यो वर्धमाननामा सिद्धान्तमवगाहमानश्चतुरशीत्याशातनाधिकारे आगते सति गुरुं प्रत्येवमुक्तवान्,—भोः स्वामिन् ! चैत्ये निवसतामस्माकमाशातना न टलति, ततोऽयं व्यवहारो मे न रोचते।' इत्युक्ति श्रुत्वा गुरुणा यथा तथा विद्र(प्र?)तारितोऽप्ययं स्वश्रद्धातो न परिभ्रष्टः। ततः श्रीउद्द्योतनसूरिं शुद्धक्रियावन्तं श्रुत्वा तत्पार्श्वे समागत्य तस्यैव शिष्यो जातस्तदुपसंपदं गृहीतवान्। ततः श्रीगुरुभिर्योगादिकं वाहयित्वा सर्वे सिद्धान्ताः पाठिताः। क्रमेण योग्यं ज्ञात्वाऽऽचार्यपदं दत्त्वा गच्छवृद्ध्यादिलाभं विज्ञायोत्तराखण्डे विहारार्थमाज्ञा दत्ता। ततो वर्धमानाचार्योऽपि गुर्वादेशं स्वीकृत्य तत्र गतः।"

त्र्यशीतिरपि शिष्या आचार्यपदं प्राप्य पृथक् २ विहारं चक्रुः। अथैकस्तस्य शिष्यो वर्धमानसूरिः, त्र्यशीतिश्चान्यदीयाः शिष्याः, एवं चतुरशीतिर्गच्छाः संजाता इति वृद्धवादः।" इति।

३८ सर्वास्वपि तपागच्छपट्टावलीषूद्द्योतनसूरेरनन्तरं सर्वदेवसूरेरेवाधिकारः प्रकृतः, तपागच्छनायकतया सर्वदेवसूरेरेव तत्र वृत्तान्तनिरूपणस्य न्याय्यत्वात्; खरतरगच्छपट्टावलीग्रन्थेषु च समस्तेषूद्द्योतनसूर्यनन्तरं वर्धमानसूरेरेव वृत्तस्योल्लेखः, खरतरगच्छाधिपतित्वात्, तत्र तस्यैव प्रस्तावस्य सामयिकत्वादिति।

३९ पूर्वोल्लिखितेन "तत्पट्टे—" [प्रस्ता० पृ० १३] इत्यादिना पट्टावलीग्रन्थेनाभिसंबध्यमानमिदम्।

४० चतुरशीतेश्चैत्यानामुपभोक्तृत्वमस्यान्यत्रापि प्रसिद्धम्, क्रमप्राप्तं यत् परित्यजतो वर्धमानसूरेः स्तुतिं

" चतुर्भिरधिकाशीतिश्चैत्यानां येन तत्यजे।
सिद्धान्ताभ्यासतः सत्यतत्त्वं विज्ञाय संयतेः ॥ ३४ ॥"

इति श्लोकेन प्रभावकचरित्रकर्तैतद्व्यतिकरज्ञापनगर्भामकार्षीत्।

४१ टलति=अपगच्छति; आशातना भवतीत्यर्थः।

"उद्द्योतनसूरिपट्टे श्रीवर्धमानसूरिः। स च षण्मासान् यावदाचाम्लतपः कृत्वा धरणेन्द्रं समाराध्य श्रीसीमन्धरस्वामिपार्श्वे तं संप्रेष्य सूरिमन्त्रं शुद्धं कारितवान्। तथा पुनरेकदा विहारं कुर्वन् सरसाख्ये पत्तने समाययौ। तस्मिन्नवसरे च[४२]..."

"तथा पुनः श्रीवर्धमानसूरिभिस्त्रयोदशसुरत्राणच्छत्रोद्दालकचन्द्रावतीनगरीस्थापकपोरवाडज्ञातीयश्रीविमलमन्त्रिणं प्रतिबोध्य श्रीअर्बुदाचले विच्छिन्नजैनतीर्थस्य पुनः प्रवृत्त्यर्थमुपदेशो दत्तः। परं तत्रस्थैर्ब्राह्मणैरुक्तम्,—इदमस्माकं तीर्थमस्ति, अत्र जिनप्रासादो न भवति' इति। ततो गुरुभिः पुष्पमालां मन्त्रयित्वा विमलमन्त्रिणे दत्त्वा च प्रोक्तम्,—'भो मन्त्रिन्! ब्राह्मणकन्याहस्ते इमां मालां प्रदाय ब्राह्मणानामग्रे इति वक्तव्यम्—'अस्मिन् पर्वते यत्र भूमावेषा माला पतति तत्रास्माकं तीर्थमस्ति।' अथ मन्त्रिणा यथा गुरुभिरुक्तं तथैव कृतम्। ततश्च यत्र माला निपतिता तत्र कलश-झल्लर्यादिपूजोपकरणसहितं प्रतिमात्रयं प्रादुर्भूतम्। तत्रैका वज्रमयी श्रीआदिनाथप्रतिमा, द्वितीयाऽम्बिकामूर्त्तिः, तृतीया च वालीनाथक्षेत्रपालमूर्त्तिरिति। अथैवं कृतेऽपि ब्राह्मणैः पुनरुक्तम्—'भवतां देवोऽस्ति, परं देवगृहं नास्ति, ततो देवस्यैव पूजा कार्या, देवगृहं तु न कारयितव्यम्' इति। तदा विमलमन्त्रिणा द्रव्यबलेन विप्रा वशीकृताः—स्वर्णमुद्राऽऽस्तरणं विधाय भूमिर्गृहीता। तत्र ऋषभदेवप्रासादः कारितः। अष्टादशकोटि-त्रिपञ्चाशल्लक्षप्रमितं द्रव्यं व्ययीकृतम्। तत्राद्यापि 'विमलवसही' इति प्रसिद्धिरास्ते। ततः श्रीवर्धमानसूरिः संवत् १०८८ मध्ये प्रतिष्ठां कृत्वा प्रान्तेऽनशनं गृहीत्वा स्वर्गं गतः।" इति।

श्रीवर्धमानसूरिपट्टधरयोः प्रकृतग्रन्थैकृद्गुर्वोः

---

४२ वक्ष्यमाणेन "तस्मिन्नवसरे च सोमब्राह्मणस्य ..." [प्रस्ता० पृ० २९] इत्यादिना पट्टावलीग्रन्थेनास्य संटङ्कः, द्विरुक्तिभयेन शिष्टस्यात्रानुल्लिखितत्वात्।

४३ अभयदेवसूरि-जिनचन्द्रसूरी इव तत्सतीर्थ्यः प्रस्तुतग्रन्थकारोऽपि 'तेसिं' इति द्व्यर्थकबहुवचनान्ततच्छब्देनैतयोर्द्विधापि भ्रातृरूपयो-

---

१ अभयदेवसूरेः

"तस्स य जाया दुवे सीसा ॥ २४१ ॥
दुव्वार-वाइ-वारण-मरट्ट-निट्ठवण-निट्ठुर-मइंदो ।
जिण-भणिय-सुद्ध-सिद्धंत-देसणा-करण-तल्लिच्छो ॥ २४२ ॥
जस्स य अईव सुललिय-पय-संचारा पसन्न-वाणीया ।
अइकोमला सिलेसे विविहालंकार-सोहिल्ला ॥ २४३ ॥
लीलावइत्ति-नामा सुवन्न-रयणोह-हारि-सयलंगा ।
वेसव्व कहा वियरइ जयम्मि कय-जण-मणाणंदा ॥ २४४ ॥
एगो ताण जिणेसरसूरी सूरोव्व उक्कड-पयावो ।
तस्स सिरी बुद्धिसागर-सूरी य सहोयरो बीओ ॥ २४५ ॥
पुन्न-सरदिंदु-सुंदर-निय-जस-पब्भार-भरिय-भुवणयलो ।
जिण-भणिय-सत्थ-परमत्थ-वित्थरासत्त-सुह-चित्तो ॥ २४६ ॥
जस्स य मुह-कुहराओ विणिग्गया अत्थ-वारि-सोहिल्ला ।
बुह-चक्कवाय-कलिया रंगंत-सुफक्किय-तरंगा ॥ २४७ ॥
तडरुह-अवसद्द-महीरुहोह-उम्मूलणम्मि सुसमत्था ।
अज्झाय-पवर-तित्था पंचंगथी नई पवरा ॥ २४८ ॥
तेसिं सीसवरो धणेसर-मुणी-"

इति पद्यैः प्रस्तुतग्रन्थकृता प्रशस्तौ समाख्यातात्यल्पवृत्तयोः श्रीजिनेश्वरसूरि-बुद्धिसागरसूर्योश्चरितलवमभयदेवसूरिप्रबन्धप्रस्तावे प्रभाचन्द्रसूरिः स्वीये प्रभावकचरित्रेऽधिगतपट्टावल्युक्ति-

---

राचार्यवर्ययोः परामर्शं कुर्वन् द्वयोरपि निजगुरुत्वं स्पष्टमवबोधयति, अन्यथाऽव्यवहिततयोद्दिष्टस्यैकस्य बुद्धिसागरसूरेरेव स्वगुरुत्वे जिज्ञापयिषितव्ये, सम्मानार्थं वा बहुवचने (S. H. 2, 2, 124) विवक्षितव्ये, पूर्वत्रैकवचनान्तेन नाम्ना निर्दिष्टयोस्तयोर्द्विवचनान्तेन बहुवचनान्तेन वा तेन परामर्शस्याघटमानत्वादिति ध्येयम् ।

४४ तच्छब्देन वर्धमानसूरिग्रहः ।

४५ "श्रीबुद्धिसागराचार्यैर्वृत्तैर्व्याकरणं कृतम्"

"तयोरिमां शिष्यवरस्य वाक्याद् वृत्तिं व्यधात् श्रीजिनचन्द्रसूरेः ।
शिष्यस्तयोरेव विमुग्धबुद्धिर्ग्रन्थार्थबोधेऽभयदेवसूरिः ॥ ४ ॥"

इति पञ्चाशकवृत्तिप्रशस्तौ,

" तयोर्विनेयेन विबुद्धिनाप्यलं वृत्तिः कृतैषाऽभयदेवसूरिणा "

इति भगवतीवृत्तौ च, एवं सर्वत्रापि प्रायस्तत्कृतिषु; जिनचन्द्राचार्यस्य संवेगरङ्गशालायां चैवमुल्लेखात् ।

विसंवादमुपाचीकथत् । प्रासङ्गिकस्यापि चास्य, अत्र स्थलस्या-

इति श्रीजिनेश्वरसूरिविरचितप्रमाणलक्षणनाम्नि ग्रन्थे, "श्रीबुद्धिसागराचार्यैः पाणिनि-चन्द्र-जैनेन्द्रविश्रान्तदुर्गटीका अवलोक्य वृत्तबन्धैः (वृत्तैः ?) धातुसूत्रगणोणादिवृत्तबन्धैः कृतं व्याकरणं संस्कृतप्राकृतशब्दसिद्धये" इति स्वोपज्ञतद्वृत्तौ,

"श्रीबुद्धिसागरः सूरिश्चक्रे व्याकरणं नवम् ।
सहस्राष्टकमानं तत् श्रीबुद्धिसागराभिधम् ॥ ८९ ॥"

इति प्रभावकचरिते,

"अन्योऽपि वित्तो भुवि बुद्धिसागरः पाण्डित्यचारित्रगुणैरनूपमैः ।
शब्दादिलक्ष्मप्रतिपादकानघग्रन्थप्रणेता प्रवरः क्षमावताम् ॥३॥"

इति, "व्याकरणादिशास्त्रकर्तुः श्रीबुद्धिसागराचार्यस्य" इति चाभयदेवसूरिनिर्मितयोः पञ्चाशकग्रन्थस्य स्थानाङ्गसूत्रस्य च वृत्त्योः, अन्यत्र चोल्लिखितस्य व्याकरणस्यैवेदमपरं नामानुमीयते, तद्वर्णनपरेण विशेषणकदम्बकेन शब्दशास्त्ररूपस्यैवार्थस्यार्पणात्, प्रकृतग्रन्थस्य B संज्ञके आदर्शपुस्तके एतस्य ('पंचग्गंथी' शब्दस्य) 'पञ्चाङ्गं व्याकरणं इति केनापि प्राचीनाविदुषा कृतेन पुराणटिप्पणेनैतदनुमानस्य संवाददानाच्च ।

---

१ ग्रन्थकारेण स्वयं ग्रन्थकर्तृत्वादर्शनात्मके धार्ष्टर्ये लाघवे वा विहितेऽपि तन्निर्मिताष्टकवृत्तिभाषा-ग्रन्थव्याख्या-पदार्थनिरूपणपद्धत्यादिसाम्येन बुद्धिसागरव्याकरणप्रणयने कारण-लक्ष्य-समयात्मैक्येन, बुद्धिसागराचार्यसाहचर्यज्ञापनेन, तन्नामधेयस्य द्विरपि च निर्विशेषणतयैव परिग्रहेण, तत्पट्टधरशिष्यश्रीमदभयदेवसूरेः स्थानाङ्गवृत्तिप्रशस्तौ "प्रमाणादिव्युत्पादनप्रवणप्रबन्धप्रणयिनः + + श्रीजिनेश्वराचार्यस्य" इति स्पष्टोल्लेखेन चानन्यलिङ्गेन, अपरेणापि चैतत्प्रसाधकहेतुसमूहेनान्यथानुपपद्यमानेन तत्कर्तृत्वस्य निर्बाधमाविष्कृतत्वात् ।

---

१ "तैरवधीरिते यत्तु प्रवृत्तिरावयोरिह ।
तत्र दुर्जनवाक्यानि प्रवृत्तेः सन्निबन्धनम् ॥ ४०३ ॥

कीदृशानि दुर्जनवाक्यानीत्याह—

शब्दलक्ष्म प्रमालक्ष्म यदेतेषां न विद्यते ।
नादिमन्तस्ततो ह्येते परलक्ष्मोपजीविनः ॥ ४०४ ॥

तथा च किं जातमित्याह—

"श्रीबुद्धिसागराचार्यैर्वृत्तैर्व्याकरणं कृतम् ।
अस्माभिस्तु प्रमालक्ष्म, वृद्धिमायातु सांप्रतम् ॥ ४०५ ॥"

इति प्रमाणलक्षणान्त्यग्रन्थेन दुर्जनवाक्यरूपकारणस्य, तन्निरासात्मकस्य लक्ष्यस्य, समयतौल्यस्य, तद्वृत्तौ "आवयोः = मम श्रीबुद्धिसागराचार्यस्य च" इति निर्विशेषणत्वस्य चोपलम्भेः ।

तिसंकीर्णत्वेऽपि पट्टावल्युल्लेखसहितस्यास्य किञ्चिद्विस्तीर्णत्वेऽपि च, विरलप्रसिद्धतयैतिहासरसास्वादज्ञानां महोपकारजनकतया च, यथाक्षरमिह निबन्धमुपयुक्ततरमत एवौचित्यशालिनं चोत्पश्यामि । तत्र प्रभावकचरित्रे ;—

"अस्ति श्रीमालवो देशः सद्वृत्तरसशालितः ।
जम्बूद्वीपास्यमाकन्दफलं सद्वर्णवृत्तसूः ॥ ४ ॥

तत्रास्ति नगरी धारा मण्डलाग्रोदितस्थितिः ।
मूलं नृपश्रियो दुष्टविग्रहद्रोहशालिनी ॥ ५ ॥
श्रीभोजराजस्तत्रासीद् भूपालः पालितावनिः ।
शेषस्येवापरे मूर्त्ती विश्वोद्धाराय यद्भुजौ ॥ ६ ॥
तत्र लक्ष्मीपतिर्नाम व्यवहारी महाधनः ।
यस्य श्रिया जितः श्रीदः कैलासाद्रिमाशीश्रियत् ॥ ७ ॥

अन्यदा मध्यदेशीयकृतब्राह्मणनन्दनौ ।
प्रह्वप्रज्ञाबलाक्रान्तवेदविद्याविशारदौ ॥ ८ ॥
अधीतपूर्विणौ सर्वान् विद्यास्थानांश्चतुर्दश ।
स्मृत्यैतिह्यपुराणानां कुलकेतनतां गतौ ॥ ९ ॥
श्रीधरः श्रीपतिश्चेतिनामानौ यौवनोद्यमात् ।
देशान्तरदिदृक्षायै निर्गतौ तत्र चागतौ ॥१०॥ त्रिभिर्विशेषकम् ॥

तौ पवित्रयतः स्मात्र लक्ष्मीधरगृहाङ्गणम् ।
सोऽपि भिक्षां ददौ भक्त्या तदाकृतिवशीकृतः ॥ ११ ॥
गेहाभिमुखभित्तौ च लिख्यते स्मास्य लेखकम् ।
टङ्कविंशतिलक्षाणां, नित्यं ददतुश्च तौ ॥ १२ ॥
सदा दर्शनतः प्रज्ञाबलादप्यतिसंकुलम् ।
तत् परिस्फुरितं सम्यक् संदम्यस्तमिवानयोः ॥ १३ ॥
जनो मत्पार्श्वतः सूपकारवत् सूपकारवान् ।
वर्तते निष्ठुरः किन्तु मम किञ्चिन्न यच्छति ॥ १४ ॥
ब्राह्मणा अपि गीर्वाणान् मन्मुखादाहुतिप्रदाः ।
तर्पयन्ति फलं तु स्यात् तत्कर्मकरतैव मे ॥ १५ ॥
इतीव कुपितो बहिरह्नैकेनापि भस्मसात् ।
विदधे तां पुरीमूरीकृतप्रतिकृतक्रियः ॥ १६ ॥ त्रिभिर्विशेषकम् ॥

लक्ष्मीपतिर्द्वितीयेऽह्नि न्यस्तहस्तः कपोलयोः ।
सर्वस्वनाशतः खिन्नो लेख्यदाहाद् विशेषतः ॥ १७ ॥
प्राप्ते काले गतौ भिक्षाकृते तस्य गृहाङ्गणे ।
प्राप्तौ प्लुष्टं च तद् दृष्ट्वा विषण्णाविदमूचतुः ॥ १८ ॥
यजमान ! तवोन्निद्रकष्टेनावां सुदुःखितौ ।
किं कुर्वहे, क्षुधा किन्तु सर्वदुःखातिशायिनी ॥ १९ ॥
पुनरीदृक्शुचाक्रान्तसत्त्ववृत्तिर्भवान् किमु ? ।
धीराः सत्त्वं न मुञ्चन्ति व्यसनेन भवादृशाः ॥ २० ॥
इत्याकर्ण्य तयोर्वाक्यमाह श्रेष्ठी निशम्यताम् ।
न मे धनान्नवस्त्रादिदाहाद् दुःखं हि तादृशम् ॥ २१ ॥
यादृग् लेखकनाशेन, निर्धर्मेण जनेन यत् ।
कलहः संभवी धर्महानिकृत् क्रियते हि किम् ? ॥२२॥ युग्मम्॥
जजल्पतुश्च तावावां भिक्षावृत्ती, न चापरम् ।
शक्नुवो नो (वोऽत्रो ?) पकर्तुं हि, व्याख्यावो लेखकं पुनः ॥२३॥
श्रुत्वेति हर्षभूः श्रेष्ठी स्वपुरस्तौ वरासने ।
न्यवेशयज्जनः स्वार्थपूरकं ध्रुवमर्हति ॥ २४ ॥
तावादितः समारभ्य तिथिवारर्क्षसंगतम् ।
व्यक्तवत्सरमासाङ्कसहितं खटिनीदलैः ॥ २५ ॥
वर्णजात्यभिधामूलद्रव्यसंख्यानवृद्धिभृत् ।
आख्यातं लेखकं स्वाख्याख्यानवद् धिषणाबलात् ॥ २६ ॥
पत्रकेषु लिखित्वा तत् श्रेष्ठी दध्यावहो ! इमौ ।
मम गोत्रसुरौ कौचित् प्राप्तौ मदनुकम्पया ॥ २७ ॥
यद्विशोपकमात्रेण वदन्तौ तावविस्मृतम् ।
दुस्तरीसंपुटे पत्रनिरपेक्षं हि लेख्यकम् ॥ २८ ॥ युग्मम् ॥
ततः सन्मान्य सद्भोज्यवस्त्राद्यैर्बहुमानतः ।
स्वगेहचित्रकौ तेन विहितौ हितवेदिना ॥ २९ ॥
जितेन्द्रियौ स तौ शान्तौ दृष्ट्वेति व्यमृशद् धनी ।
शिष्यौ मद्गुरुपार्श्वेऽमू स्तां चेत् तत्संघभूषणौ ॥ ३० ॥
इतः सपादलक्षेऽस्ति नाम्ना कूर्चपुरं पुरम् ।
मषीकूर्चकमाधातुं यदलं शात्रवानने ॥ ३१ ॥
अल्लभूपालपुत्रोऽपि शक्योऽतीव धराधरः ।
श्रीमान् भुवनपालाख्यो विख्यातः सान्वयाभिधः ॥ ३२ ॥
तत्रासीत् प्रशमश्रीभिर्वर्धमानगुणोदधिः ।

श्रीवर्धमान इत्याख्यः सूरिः संसारपारभूः ॥ ३३ ॥
चतुर्भिरधिकाऽशीतिश्चैत्यानां येन तत्यजे ।
सिद्धान्ताभ्यासतः सत्यतत्त्वं विज्ञाय संसृतेः ॥ ३४ ॥
अन्यदा विहरन् धारापुर्यां धाराधरोपमः ।
आगाद् वाग्ब्रह्मधाराभिर्जनमुज्जीवयन्नमुम् ॥ ३५ ॥
लक्ष्मीपतिस्तदाकर्ण्य श्रद्धालक्ष्मीपतिस्ततः ।
ययौ प्रद्युम्न-शान्ताभ्यामिव ताभ्यां गुरोर्नतौ ॥ ३६ ॥
सर्वाभिगमपूर्वं स प्रणम्योपाविशत् प्रभुम् ।
तौ विधाय निविष्टौ च करसंपुटयोजनम् ॥ ३७ ॥
चर्यलक्षणवर्यौ च दध्यौ वीक्ष्य तनुं तयोः ।
गुरुराहानयोर्मूर्त्तिः सम्यक् स्वपरजित्वरी ॥ ३८ ॥
तौ च प्राग्भवसंबद्धाविवानिमिषलोचनौ ।
वीक्षमाणौ गुरोरास्यं व्रतयोग्यौ च तैर्मतौ ॥ ३९ ॥
महाव्रतभरोद्धारधुरीणौ तपसो निधी ।
अध्यापितौ च सिद्धान्तं योगोद्वहनपूर्वकम् ॥ ४० ॥
ज्ञात्वौचित्यं च सूरित्वे स्थापितौ गुरुभिश्च तौ ।
सिद्धवासो हि सौरभ्यवासं समनुगच्छति ॥ ४१ ॥
जिनेश्वरस्ततः सूरिरपरो बुद्धिसागरः ।
नामभ्यां विश्रुतौ पूज्यैर्विहारेऽनुमतौ तदा ॥ ४२ ॥
ददे शिक्षेति तैः श्रीमत्पत्तने चैत्यसूरिभिः ।
विघ्नं सुविहितानां स्यात् तत्रावस्थानवारणात् ॥ ४३ ॥
युवाभ्यामपनेतव्यं शक्त्या बुद्ध्या च तत् किल ।
यदिदानींतने काले नास्ति प्राज्ञो भवत्समः ॥ ४४ ॥ युग्मम् ॥
अनुशास्तिं प्रतीच्छाव इत्युक्त्वा गुर्जरावनौ ।
विहरन्तौ शनैः श्रीमत्पत्तनं प्रापतुर्मुदा ॥ ४५ ॥
सद्गीतार्थपरीवारौ तत्र भ्रान्तौ गृहे गृहे ।
विशुद्धोपाश्रयालाभाद् वाचां सस्मरतुर्गुरोः ॥ ४६ ॥
श्रीमान् दुर्लभराजाख्यस्तत्र चासीद् विशाम्पतिः ।
गीःपतेरप्युपाध्यायो नीतिविक्रमशिक्षणात् ॥ ४७ ॥
श्रीसोमेश्वरदेवाख्यस्तत्र चासीत् पुरोहितः ।
तद्गेहे जग्मतुर्युग्मरूपौ सूर्यसुताविव ॥ ४८ ॥
तद्द्वारे चक्रतुर्वेदोच्चारं संकेतसंयुतम् ।
तीर्थं सत्यापयन्तौ च ब्राह्मं पैत्र्यं च दैवतम् ॥ ४९ ॥

चतुर्वेदीरहस्यानि सारणीशुद्धिपूर्वकम् ।
व्याकुर्वन्तौ स शुश्राव देवतावसरे ततः ॥ ५० ॥
तद्ध्वानध्याननिर्मग्नचेताः स्तम्भितवत् तदा ।
समग्रेन्द्रियचैतन्यं श्रुत्योरेव स नीतवान् ॥ ५१ ॥
ततो भक्त्या निजं बन्धुमाप्याय वचनामृतैः ।
आह्वानाय तयोः प्रैषीत् प्रेक्षापेक्षी द्विजेश्वरः ॥ ५२ ॥
तौ च दृष्ट्वान्तरायान्तौ दध्यावम्भोजभूः किमु ।
द्विधाभूयाऽद आदत्त दर्शनं स्वस्य दर्शनम् ॥ ५३ ॥
हित्वा भद्रासनादीनि तदत्तान्यासनानि तौ ।
समुपाविशतां शुद्धस्वकम्बलनिषद्ययोः ॥ ५४ ॥
वेदोपनिषदां जैनतत्त्वश्रुतगिरां तथा ।
वाग्भिः साम्यं प्रकाश्यैतावभ्यधत्तां तदाशिषम् ॥ ५५ ॥
तथाहि—
"अपाणिपादो ह्यमनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति विश्वं नहि तस्य वेत्ता शिवो ह्यरूपःस जिनोऽक्तात्तः ॥"
ऊचतुश्चानयोः सम्यगवगम्यार्थसंग्रहम् ।
दयया भ्यधिकं जैनं तत्रावामाद्रियावहि ॥ ५७ ॥
युवामवस्थितौ कुत्रेत्युक्ते तेनोचतुश्च तौ ।
न कुत्रापि स्थितिश्चैत्यवासिभ्यो लभ्यते यतः ॥ ५८ ॥
चन्द्रशालां निजां चन्द्रज्योत्स्नानिर्मलमानसः ।
स तयोरार्पयत् तत्र तस्थतुः सपरिच्छदौ ॥ ५९ ॥
द्विचत्वारिंशता भिक्षादोषैर्मुक्तमलोलुपम् ।
नवकोटीविशुद्धं चायातं भैक्षमभुञ्जताम् ॥ ६० ॥
मध्याह्ने याज्ञिकस्मार्तदीक्षितानग्निहोत्रिणः ।
आहूय दर्शितौ तत्र निर्व्यूढौ तत्परीक्षया ॥ ६१ ॥
यावद् विद्याविनोदोऽयं विरिञ्चेरिव पर्षदि ।
वर्तते तावदाजग्मुर्नियुक्ताश्चैत्यमानुषाः ॥ ६२ ॥
ऊचुश्च ते झटित्येव गम्यतां नगराद् बहिः ।
अस्मिन् न लभ्यते स्थातुं चैत्यबाह्यसिताम्बरैः ॥ ६३ ॥
पुरोधाः प्राह निर्णेयमिदं भूपसभान्तरे ।
इति गत्वा निजेशानामाख्यातमिह भाषितम् ॥ ६४ ॥
इत्याख्याते च तैः सर्वैः समुदायेन भूपतिः ।
वीक्षितः प्रातरायासीत् तत्र सौवस्तिकोऽपि सः ॥ ६५ ॥

व्याजहारायं देवास्मद्गृहे जैनमुनी उभौ ।
स्वपक्षे स्थानमप्राप्नुवन्तौ संप्रापतुस्ततः ॥ ६६ ॥
मया च गुणग्राह्यत्वात् स्थापितावाश्रये निजे ।
भट्टपुत्रा अमीभिर्मे प्रहिताश्चैत्यपक्षिभिः ॥ ६७ ॥
अत्रादिशत मे क्षूणं दण्डं वात्र यथार्हतम् ।
श्रुत्वेत्याह स्मितं कृत्वा भूपालः समदर्शनः ॥ ६८ ॥
मत्पुरे गुणिनः कस्माद् देशान्तरत आगताः ।
वसन्तः केन वार्यन्ते को दोषस्तत्र दृश्यते ? ॥ ६९ ॥
अनुयुक्ताश्च ते चैवं प्राहुः शृणु महीपते ! ।
पुरा श्रीवनराजोऽभूच्चापोत्कटवरान्वयः ॥ ७० ॥
स बाल्ये वर्धितः श्रीमद्देवचन्द्रेण सूरिणा ।
नागेन्द्रगच्छभूद्वारप्राग्वराहोपमास्पृशा ॥ ७१ ॥
पञ्चाश्रयाभिधस्थानस्थितचैत्यनिवासिना ।
पुरं स च निवेश्येदमत्र राज्यं ददौ नवम् ॥ ७२ ॥
वनराजविहारं च तत्रास्थापयत प्रभुः ।
कृतज्ञत्वादसौ तेषां गुरूणामर्हणं व्यधात् ॥ ७३ ॥
व्यवस्था तत्र चाकारि संघेन नृपसाक्षिकम् ।
संप्रदायविभेदेन लाघवं च [न ?] यथा भवेत् ॥ ७४ ॥
चैत्यगच्छयतिव्रातसंमतो वसताद् मुनिः ।
नगरे मुनिभिर्नात्र वस्तव्यं तदसंमतैः ॥ ७५ ॥
राज्ञां व्यवस्था पूर्वेषां मान्या पाश्चात्यभूमिपैः ।
यदादिशसि तत्कार्यं राजन्नेवं स्थिते सति ॥ ७६ ॥
राजा प्राह सदाचारं प्राग्भूपानां वयं दृढम् ।
पालयामो गुणवतां पूजां तूल्लङ्घयेम न ॥ ७७ ॥
भवादृशां सदाचारनिष्ठानामाशिषा नृपाः ।
एधन्ते, युष्मदीयं तद् राज्यं नात्रास्ति संशयः ॥ ७८ ॥
उपरोधेन नो यूयममीषां वसनं पुरे ।
अनुमन्यध्वमेवं च श्रुत्वा तेऽत्र तथा दधुः ॥ ७९ ॥
सौवस्तिकस्ततः प्राह स्वामिन्नेषामवस्थितौ ।
भूमिः काप्यश्रयस्यार्थे श्रीमुखेन प्रदीयताम् ॥ ८० ॥
तदा समाययौ तत्र शैवदर्शनवासवः ।

---

१ मतान्तरापेक्षया शीलगुणसूरिणा (See Jaina Dharma Prachina Itihasa Part I, P. 43)

ज्ञानदेवाभिधः क्रूरसमुद्राबिरुदाहितः ॥ ८१ ॥
अभ्युत्थाय समभ्यर्च्य निविष्टं निज आसने ।
राजा व्याजिज्ञपत् किञ्चिदद्य विज्ञप्यते प्रभो ! ॥ ८२ ॥
प्राप्ता जैनषर्यस्तेषामर्पयध्वमुपाश्रयम् ।
इत्याकर्ण्य तपस्वीन्द्रः प्राह प्रहसिताननः ॥ ८३ ॥
गुणिनामर्चनां यूयं कुरुध्वं विधुतैनसाम् ।
सोऽस्माकमुपदेशानां फलपाकश्रियां निधिः ॥ ८४ ॥
शिव एव जिनो बालत्यागात् परपदास्थितः ।
दर्शनेषु विभेदो हि चिह्नं मिथ्यामतेरिदम् ॥ ८५ ॥
निस्तुषव्रीहिहट्टानां मध्ये त्रिपुरुषाश्रिता ।
भूमिः पुरोधसा ग्राह्योपाश्रयाय यथारुचि ॥ ८६ ॥
विघ्नः स्वपरपक्षेभ्यो निषेध्यः सकलो मया ।
द्विजस्तच्च प्रतिश्रुत्य तदाश्रयमकारयत् ॥ ८७ ॥
ततः प्रभृति संज्ञज्ञे वसतीनां परम्परा ।
महद्भिः स्थापितं वृद्धिमश्नुते नात्र संशयः ॥ ८८ ॥
श्रीबुद्धिसागरः सूरिश्चक्रे व्याकरणं नवम् ।
सहस्राष्टकमानं तत् श्रीबुद्धिसागराभिधम् ॥ ८९ ॥
अन्यदा विहरन्तश्च श्रीजिनेश्वरसूरयः ।
पुनर्धारापुरीं प्रापुः सपुण्यप्राप्यदर्शनाः ॥ ९० ॥
श्रेष्ठी महीधरस्तत्र पुरुषार्थत्रयोन्नतः ।
मुक्त्वैकां स्वधने संख्यां यः सर्वत्र विचक्षणः ॥ ९१ ॥
तस्याभयकुमाराख्यो धनदेव्यङ्गभूरभूत् ।
पुत्रः, सहस्रजिह्वोऽपि यद्गुणोक्तौ नहि प्रभुः ॥ ९२ ॥
सपुत्रः सोऽन्यदा सूरिं प्रणन्तुं सुकृती ययौ ।
संसाराऽसारतामूलं श्रुतो धर्मश्चतुर्विधः ॥ ९३ ॥
अथाभयकुमारोऽसौ वैराग्येण तरङ्गितः ।
आपपृच्छे निजं तातं तपःश्रीसंगमोत्सुकः ॥ ९४ ॥
अनुमत्या ततस्तस्य गुरुभिः स च दीक्षितः ।
ग्रहणासेवनारूपशिक्षाद्वितयमग्रहीत् ॥ ९५ ॥
स चावगाढसिद्धान्तस्तत्त्वप्रेक्षानुमानतः ।
बभौ महाक्रियानिष्ठः श्रीसङ्घाम्भोजभास्करः ॥ ९६ ॥
श्रीवर्धमानसूरीणामादेशात् सूरितां ददौ ।
श्रीजिनेश्वरसूरिश्च ततस्तस्य गुणोदधेः ॥ ९७ ॥"

खरतरगच्छपट्टावल्यां पुनः—

"तस्मिन्नवसरे च सोमब्राह्मणस्य द्वौ पुत्रौ शिवदास-बुद्धिसागरनामानौ, एका च कल्याणवतीनाम्नी पुत्री; एवं त्रयोऽप्येते सोमेश्वरमहादेवस्य यात्रार्थं गच्छन्तः सरसाभिधाने पत्तने समाजग्मुः। तत्र सरस्वत्यां नद्यां स्नात्वा रात्रौ तत्रैव सुप्ताः। ततोऽर्धरात्रवेलायां सोमेश्वरः प्रादुर्भूय तेभ्य इत्युवाच;-'भोः! प्रसन्नोऽहम्, मार्गयत मनोवाञ्छितं वरम्। ततस्तैर्वैकुण्ठे याचिते स प्राह;—'भोः! ममापि वैकुण्ठं नास्ति, ततो भवद्भ्यः कुतो ददामि? परं यदि भवतां वैकुण्ठेच्छास्ति तर्हि श्रीवर्धमानसूरेश्चरणसेवा कार्या, स एवको वैकुण्ठदाताऽस्ति' इत्युक्त्वा देवोऽदृश्यो बभूव। ततः प्रातःकाले ते त्रयोऽपि जना नद्यां स्नात्वोपाश्रयमागत्य च गुरुभ्यो वैकुण्ठममार्गयन्। ततो गुरुभिरप्येकस्य भ्रातुर्मस्तकशिखायां स्थितं दर्शयित्वा दयामयं श्रीजैनधर्मं द्योतयित्वा तान् प्रतिबोध्य दीक्षा दत्ता। योगादिकं च वाहयित्वा सर्वसिद्धान्तपारगाः कृताः। शिवदासस्य 'जिनेश्वर-'इति नाम कृतम्।

"एकदा जिनेश्वरेणोक्तम्-'स्वामिन्! यदि गुर्जरदेशे गम्यते तदा भूयसी धर्मोन्नतिः स्यात्।' ततो गुरुभिरुक्तम्,-'तत्र हीनाचारिणामसंयमिनां चैत्यवासिनां बहुः प्रचारोऽस्ति, ते उपद्रवं कुर्युः, ततस्तत्र न गम्यते।' तदा पुनर्जिनेश्वरेणोक्तम्—'स्वामिन्! बूकाभयात् किं वस्त्रं परित्यज्यते? ततो मह्यं बुद्धिसागराचार्यस्य च तत्र गमनार्थमाज्ञा प्रदीयताम्।' अथ गुरुभिरप्येतत् श्रुत्वा जिनेश्वर-बुद्धिसागराभ्यामाचार्यपदं दत्त्वा गुर्जरदेशं प्रति विहाराज्ञा दत्ता। तावपि गुर्वाज्ञया तं देशं प्रति विहारं चक्रतुः। तथा गुरुभिः कल्याणवती साध्वी महत्तरा कृता।

"तत्पट्टे (वर्धमानसूरिपट्टे) चत्वारिंशत्तमः श्रीजिनेश्वरसूरिः। स च बुद्धिसागरेण सह मरुदेशाद् विहारं कुर्वन् क्रमेण गुर्जरदेशेऽणहिलपुरपत्तने समागतः। तत्र दुर्लभराजस्य पुरोहितः शिवशर्मा नाम ब्राह्मणः स्वमातुलोऽस्ति, तद्गृहं प्राप्तः। अथ ब्राह्मणो बहुच्छात्रांस्तर्कव्याकरणादिशास्त्राणि पाठयन्नेकस्य वेदपदस्याशुद्धमर्थमुवाच। तदा श्रीजिनेश्वरसूरिभिः प्रोक्तम्-'अस्य पदस्यायमर्थो न भवति, भवद्भिः कथमित्थं पाठ्यते?' इति। तदा विप्रेणोक्तम्-'भवतां वेदार्थपरिज्ञानं कुतः? चेद्भवेत्, तर्हि भवद्भिरे-

---

१ प्रकृतग्रन्थकर्तापि सुरसुन्दरीकथाग्रन्थनप्रयोजनाविर्निदेशे

"सीसिणि-मयहरियाए गुरु-भगिणीए अलंघवयणाए।
सिरि-कल्लाणमईए पवत्तिणीए उ वयणेण ॥ ४१ ॥"

इत्यार्यामिमामुपनिबध्नन् नामग्राहमेतस्याः सूर्योरनयोर्भगिनीत्वं संवादयति।

वास्यार्थो वाच्यः' इति । अथैतद् वचः श्रुत्वा गुरुभिर्ये केऽपि पुरोहितस्य संदेहा अभूवंस्ते सर्वेऽपि निरस्ताः । ततः पुरोहितेन पृष्टम्–'को भवतां निवासः ? कश्च भवतां पिता ?' इति । तदा गुरुभिर्वाराणसी नगरी, सोमब्राह्मणश्च प्रोक्तः । तदा तेन ज्ञातमेतौ मम भागिनेयौ । ततश्च बहुमानपुरस्सरं स्वगृहे रक्षितौ । अथैषा वार्ता चैत्यवासिभिः श्रुता, चिन्तितं च स्वचित्ते, यतो जिनेश्वरसूरिरत्रागतोऽस्ति, स तु संवेगरङ्गक्लिन्नगात्रः परमशुद्धक्रियापात्रमस्ति, वयं तु शिथिला हीनाचारिणः स्मः; ततोऽयं केनापि प्रकारेण नगराद् निष्कासनीयः, अन्यथाऽस्माकं निन्दा भविष्यतीति । एवं विचिन्त्य कियद्भिश्चैत्यवासिभिः संभूय दुर्लभनृपाय प्रोक्तम्,–'महाराज ! अस्मिन् पुरे दिल्लीतो ग्रन्थिच्छोटकाः समागताः सन्ति, ते च भवत्पुरोहितस्य गृहे तिष्ठन्ति ।' अथ राज्ञैतद्वाक्यं श्रुत्वा पुरोहितमाहूय पृष्टम्–'भो भवद्गृहे चौरा आगताः श्रूयन्ते ?' तदा तेनोक्तम्–'राजन् ! मद्गृहे तु शुद्धाचारवन्तः सन्मार्गसंचारिणो मुनीश्वराः सन्ति, न चौराः, किन्तु ये केऽपि तेषु चौरव्यपदेशं कुर्वन्ति त एव चौराः ।' तदा राज्ञा आचारदर्शनार्थं जिनेश्वरसूरय आहूताः । आगता गुरवो राजसभायामास्तृतं वस्त्रं दूरीकृत्य रजोहरणेन भूमिं प्रमार्ज्य ईर्यापथिकीं प्रतिक्रम्य स्वकम्बलमास्तीर्य स्थिताः । अथैतत्सद्गुर्वालोकनादानन्दितेन राज्ञोक्तम्–'सन्मार्गधारका एवंविधा एव भवन्ति' इति । तथा पुनर्भूपेन एतेभ्यो विरुद्धं चैत्यवासिनामाचारं दृष्ट्वा गुरुभ्यो मुनीनामाचारः पृष्टः । तदा जिनेश्वरसूरिभिः प्रोक्तम्–'अस्माभिर्मुखात् किं कथ्यते, भवतां देवाधिष्ठितं सरस्वतीभाण्डागारमस्ति, तत्र सर्वमतस्वरूपनिवेदकानि पुस्तकानि सन्ति, ततो भाण्डागारात् पुस्तकमानाययितव्यम् ।' तदा राज्ञा तथैव कृते सति दशवैकालिकपुस्तकं हस्ते आगतम् । तच्च राजसभायामानीतम् । ततो गुरुभिः प्रोक्तम्—'इदं पुस्तकमेतेषां चैत्यवासिनामेव हस्ते देयम्, एते एव वाचयन्तु ।' ततो वाचयद्भिस्तैः साध्वाचारपत्राणि मुक्तानि । तदानीं गुरुभिरुक्तम्–'राजसभायां दिवसे चौर्यं जायते ।' राज्ञा पृष्टम्–'तत् कथम् ?' तदा तैरुक्तम्–'एभिः पत्राणि मुक्तानि ।' राज्ञोक्तम्–'तर्हि यूयमेव वाचयत ।' गुरुभिरुक्तम्–'नात्रास्माकं कार्यम्, पक्षपातरहितैर्ब्राह्मणैर्वाचनीयम् ।' ततो ब्राह्मणेभ्यः पुस्तके दत्ते सति तैर्यथार्थं वाचितम् । तदा शास्त्राविरुद्धाचारदर्शनेन जिनेश्वरसूरिमुद्दिश्य 'अतिखरा एते' इति राज्ञा प्रोक्तम् । तत एव खरतरविरुदं लब्धम् । तथा चैत्यवासिनो हि पराजयप्रापणात् 'कुंवलाः' इति नामधेयं प्राप्ताः । एवं च सुविहितपक्षधारकाः श्रीजिनेश्वरसूरयो विक्रमतः १०८० वर्षैः खरतरविरुदधारका जाताः ।

"तथा पुनरेकदा मरुदेवानाम्नी साध्वी चत्वारिंशदिनानि यावदनशनं कृतवती। प्रान्ते निर्जरां कारयाद्भिर्जिनेश्वरसूरिभिरुक्तम्-'स्वकीयमुत्पत्तिस्थानं ज्ञापनीयम्।' ततः सा गुरुवचः स्वीकृत्य कालं कृत्वा देवपदं प्राप्ता। अथैकदा स देवः सीमन्धरस्वामिवन्दनार्थं गच्छन् ब्रह्मशान्तियक्षं प्रत्युवाच-'भवता जिनेश्वरसूरीणां पार्श्वे गत्वा 'म स ट स ट' इत्येतानि पञ्चाक्षराणि कथनीयानि। एषामर्थं स्वयमेव गुरवो ज्ञास्यन्ति' इति। तदा यक्षेणागत्य तान्यक्षराणि कथितानि। ततो गुरुभिस्तेषामर्थो निगदितः; तद्यथा;—

मरुदेवी नाम अज्जा गणिनी जा आसि तुम्ह गच्छम्मि।
सग्गम्मि गया पढमे देवो जाओ महड्ढीओ ॥ १ ॥
टक्कलयम्मि विमाणे दो-सागर-आउसो समुप्पन्नो।
समणेसस्स जिणेसरसूरिस्स इय संकहिज्जासु ॥ २ ॥
टक्कउरे जिणवंदणनिमित्तमिह आगएण देवेण।
चरणम्मि उज्जमो तो कायव्वो, किंच सेसेहिं ? ॥ ३ ॥ इति।
एवंविधाः श्रीजिनेश्वरसूरयः प्रान्तेऽनशनं कृत्वा स्वर्गं प्राप्ताः ॥"

केचिदाचार्या विक्रमात् १०२४ तमे वर्षेऽस्मादेव श्रीजिनेश्वरसूरेः खरतरगच्छोत्पत्तिं मन्यन्ते, अवमन्यन्ते च मतमेतदपरे, जिनेश्वरसूरिणा तच्छिष्याजिनचन्द्राभयदेवप्रभृतिभिश्च सूरिभिः प्रणीतेष्वनल्पग्रन्थेष्विदानीमप्युपलभ्यमानेषु विद्यमानविस्तृतप्रशस्तिष्वेकतमस्मिन्नपि तस्मिन् खरतरगच्छोल्लेखमात्र-

---

१ इतश्चापि मतमेतदयुक्तम्, जिनेश्वरसूरेः संवत् १०२४ विद्यमानतायां एव दुरुपपादत्वात्, विक्रमात् १०८० तमेऽब्दे तैरष्टकवृत्तेर्निर्माणस्य तत्र स्वयं प्रतिपन्नत्वात्; (प्र० पृ०२८) विक्रमात् १०८८ तमे च संवत्सरे तैरेव निजशिष्याभयदेवसूरेराचार्यपददानस्य सर्वाविसंवादतया प्रसिद्धत्वेन ततोऽप्यूर्ध्वं तस्य विद्यमानतया महतः कालव्यवधानस्यापत्तेः; खरतरविरुदस्यापि विक्रमात् १०८८ तमे वर्षे (प्र० पृ० २६) लब्धत्वेन खरतरगच्छबीजस्यैव तदानीमभावात्, तदर्पयितुः पत्तनेशदुर्लभराजस्य राज्यस्यापि तत्कालेऽभावादिति। २ यत्तु श्रीअभयदेवसूरेर्जिनचन्द्रसूरिशिष्यतया प्रतिपादनम् (Dr. Peterson Report 5 th.) तच्चिन्त्यम्, स्वयं जिनचन्द्रसूरिणा निजे संवेगरङ्गशालानाम्नि ग्रन्थे, अभयदेवसूरिणा च भगवत्यादिवृत्तिप्रशस्तौ तत्सब्रह्मचारित्वस्य स्पष्टमभिधानात् [प्रस्ता० पृ० १७]।

स्याप्यदर्शनात्[1], सर्वत्र चैन्द्रकुलोल्लेखस्यैवोपलम्भाच्च । खरतरगच्छोत्पत्तेर्विक्रमात् १२०४ तमे वर्षे श्रीजिनदत्तसूरिसकाशादेव लब्धात्मलाभत्वात्, तस्य सूरेरभिमानयुक्तस्वभावतया प्रष्टव्यविषयं प्रचण्डरूपतयोत्तरयता लोके 'खरतर'—इति प्रसिद्धेः संजातत्वात्, स्वयं तेनापि तस्याङ्गीकारात्[2] ।

प्रस्तुतसूरिवर्ययोः कृतिविषये तावत् जिनेश्वरसूरिणा निर्मिता ग्रन्था इमे;—

१ लीलावतीकथा[3] । २ हारिभद्राष्टकवृत्तिः[4] ।

---

१ धर्मसागरोपाध्यायाः प्रवचनपरीक्षायां खरतरगच्छोत्पत्तिप्रकरणे; अन्यत्रापि च—In this Dharmasagar tries to prove that is owed its rise not to Jineshwara, the pupil of Vardhaman in samvat 1024 as is commonly believed, but to Jinadatta in samvat 1204 (Buhler's Report p. 148).

२ तथा चाष्टकवृत्तौ ग्रन्थकर्ता स्वयम्;—

"सूरेः श्रीवर्धमानस्य निःसंबन्धविहारिणः ।
हारिचारित्रपात्रस्य श्रीचन्द्रकुलभूषिणः ॥ २ ॥
पादाम्भोजद्विरेफेण श्रीजिनेश्वरसूरिणा ।
अष्टकानां कृता वृत्तिः सत्त्वानुग्रहहेतवे ॥ ३ ॥"

३ श्रीजिनवल्लभसूरिविरचितस्य गणधरसार्धशतकप्रकरणस्य जिनपतिसूरिशिष्यसुमतिगणिविरचितायां वृत्तौ व्यक्तमेतत्; अपरत्रापि च;—

"The Kharatara sect then arose according to an old gatha in Samvat 1204. Jindatta was a proud man, and even in his pert answers to others mentioned by Sumatigani pride can be clearly detected. He was, therefore, called Kharatara by the people, but he gloried in the new appellation and willingly accepted it." (Dr. Buhler's Report p. 149).

४ प्रस्तुतग्रन्थप्रशस्तौ प्रशस्तशब्देष्वेतदुल्लेखस्योपलेभानस्य संदर्शितत्वात् प्रस्ता० पृ० १७ । हेमचन्द्राचार्योऽपि काव्यानुशासनटीकायां पद्यकथोदाहरणप्रसङ्गे "काचित् पद्यमयी यथा लीलावती" इत्यनेनेमामेव स्मरन् विभाव्यते । ५ ग्रन्थोऽयं जावालिपुरे विक्रमात् १०८० तमे वर्षे निर्मितः, यदाह स एव प्रशस्तौ;—

२ पंचलिङ्गीप्रकरणम् । ४ वीरचरित्रम् ।

५ कथारत्नकोशः । ६ प्रमाणलक्षणं सवृत्तिकम् ।

एतदन्येषामुल्लेखो नाद्यावधि क्वाप्यासादितः ।

बुद्धिसागरसूरेश्च बुद्धिसागरव्याकरणव्यतिरिक्ता अपरा कृतिर्न दृष्टिपथं श्रुतिपथं वाऽवतीर्णा ।

स्ववंशपारम्पर्यानन्तरं प्रकृतग्रन्थकृता सुरसुन्दरीग्रन्थविरचनासमयतत्स्थलादिरेवमनेन श्लोकेन विनिरदेशि;—

"तेसिं सीसवरो धणेसरमुणी एयं कहं पायडं
चड्डावल्लिपुरी ठिओ सगुरुणा आणाए पाढंतरा ।
कासी विक्कमवच्छरम्मि य गए बाणंक-सुन्नोडुपे,
मासे भद्दवए गुरुम्मि कसिणे बीया-धणिट्ठा-दिणे ॥ २४९ ॥"

एतेन ग्रन्थकर्तुरमुष्य सत्तासमयोऽपि विक्रमस्यैकादशशतीरूप इति विनिर्णये न किञ्चिदू वक्तव्यमवशिष्यते ।

एतद्व्यतिरिक्तं ग्रन्थकृद्विषयकमितिवृत्तसंबन्धि जन्मस्थलकुल-विहितकार्यव्यूहादिवृत्तान्तस्यापरैः प्राक्तनैरिवानेन ग्रन्थकर्त्रापि न स्वयमत्रापरत्र वा विनिर्दिष्टम्, नापि तत्समानकालिकेन पश्चाद्भवेन वा केनचन विदुषा तदुल्लिखितं विहितगवेषणायासेनाद्यावध्युपलब्धम्, प्राच्यमहात्मनां फलानुपेयप्रारम्भरूपसिद्धान्तावलम्बितया वस्तुस्वरूपमात्रप्रदर्शनेऽपि स्वात्मश्लाघापातकशङ्काकलङ्कपङ्किलताङ्गीकारितया स्वयं स्वेतिहासलेखनकार्ये प्रायः प्रवृत्तिमात्रस्याप्यविधानस्य साधारणत्वात्, तत्समानकालिकानामन्यपण्डितानां स्वदृष्टिसम्मुखत्वेन तादृशगौरवास्पदाभावेन तत्र दुर्लक्ष्यात्, अन्यान्यविषयेष्विव वा तदानीं पुरावृत्तविषये पुरातनसंख्यावतां तादृशादराभावस्यैव मुख्यकारणत्वात्, पश्चाद्भवानां चास्माकमिवाहमहमिकया

"समानामधिकेऽशीत्या सहस्रे विक्रमाद् गते ।
श्रीजावालिपुरे रम्ये वृत्तिरेषा समापिता ॥ ४ ॥" इति ।

१ See Jaina Dharma Prachina Itihasa Part 1.P 43.

२ प्रस्ता० पृ० १८ । ३ अभयदेवसूरेः स्थानाङ्गवृत्तौ" व्याकरणादिशास्त्रकर्तुः श्रीबुद्धिसागराचार्यस्य च" इत्यत्रोक्तादिशब्दवाच्यमन्तरेण ।

तदभिलषतामपि तद्वेदनोपायाभावसाम्यादिति ।

ग्रन्थकृता ग्रन्थस्यास्य 'सुरसुंदरीकहा' इति कथाभिधानं यथार्थं व्यधायि; यतोऽत्र

"श्लोकैर्वंशं तु संक्षेपात् कविर्यत्र प्रशंसति ।
मुख्यार्थस्यावताराय भवेद् यत्र कथान्तरम् ॥
परिच्छेदो न यत्र स्याद् न स्याद् वा लम्भकः क्वचित् ।
सा कथा नाम तद्वर्गे निबध्नीयाच्चतुष्पदीम् ॥"

इत्यग्निपुराणोक्तं कथालक्षणं सामस्त्येनानन्वीयमानमपि,

"धीरशान्तनायिका गद्येन पद्येन वा सर्वभाषा कथा"

इति हेमचन्द्राचार्येण काव्यानुशासने समुदीरितं (पृ० ३३८)

"कथायां सरसं वस्तु पद्यैरेव विनिर्मितम् ।
क्वचिदत्र भवेदार्या क्वचिद् वक्त्रापवक्त्रके ॥
आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्तनम् ।"
"यथा कादम्बर्यादि"

इति विश्वनाथकविना दर्पणेऽभिहितं (पृ० ३०३) च तल्लक्षणं सम्यगिह संगच्छमानमीक्ष्यते । यद्यप्युक्तलक्षणं कथासामान्यस्यैव, प्रकृता कृतिश्च "समस्तफलान्तेतिवृत्तवर्णना समरादित्यवत् सकलकथा" इतिस्वरूपेण सकलकथानाम्ना कथाप्रभेदेनैवाङ्किता, तथापि सामान्यार्थाभिधायिशब्देनापि तद्विशेषवाचकत्वस्य भूयोदर्शनात्, अन्यथा कीटादौ जीवविशेषे जीवसामान्याभिधायकस्य सत्त्वादिशब्दस्याप्रवृत्तेराबालगोपालप्रसिद्धव्यवहारोच्छेदप्रसङ्गात्, अत एव सामान्यविशेषयोर-

---

१ "वोच्छं संवेगकरिं कहं तु सुरसुन्दरीं नाम ।" इत्यनेन ग्रन्थोपक्रमे, "सुरसुन्दरीनामाए कहाए पढमो परिच्छेओ" इत्यादिना सकलपरिच्छेदावसाने च ग्रन्थकारस्यैव स्पष्टं तथावचनात् । २ नायिकोपलक्षणत्वादस्य लक्षणांशस्य नायिकाप्रधानायामप्यस्यां कथायां न लक्षणान्वयः । ३ कादम्बरीह क्षेमेन्द्रकविनिबद्धा पद्यमयी विवक्षिता, न तु गद्यरूपा बाणभट्टोपज्ञा सा, दृष्टान्तत्वानुपपत्तेः । ४ काव्यानुशासनम्, पृ० ३४० । ५ कथाप्रभेदत्वं चास्याः "एते च कथाप्रभेदा एवेति न पृथग् लक्षिताः" इत्युक्त्याऽलङ्कारचूडामणौ स्पष्टम् (पृ० ३४०) ।

भेदस्यान्यत्र महता प्रबन्धेन सिद्धान्तितत्वादिति ग्रन्थकृता कृतः सामान्येन तन्निर्देशो न मनागपि दोषमावहतीति। अस्माभिस्तु समयप्रसिद्ध्यनुरोधाकृष्टैः सकलकथापर्यायेण[2] 'चरित' शब्देनैव ग्रन्थस्यैतस्याभिधानं प्रसेधयद्भिर्विशेषलक्षणमेवादृतमिति दूषणाशङ्काऽनुत्थानोपहतैवेति विदाङ्कुर्वन्तु विद्वांसः।

पद्यमयीं च कथां विनिर्मिमाणेन ग्रन्थकारेण समस्तेऽपि ग्रन्थे गाथापराह्वयमार्याच्छन्द एव व्यवाहारि, केवलमितरश्लोकवद्धचरितग्रन्थेष्विवात्रापि प्रतिपरिच्छेदमन्ते, क्वचिच्च वर्णनीयतादृशवस्त्वायत्तेनान्तःपरिच्छेदमपि भिन्नभिन्नो वृत्तवारो व्यापारि। व्यभाजि च षोडशसु परिच्छेदेषु संपूर्णोऽपि ग्रन्थः, प्रत्येकं यत्रानूनमनधिकं च पद्यानां सार्धशतद्वयं न्यभान्त्सि, विमुच्यान्तिममेकं परिच्छेदमपवादरूपमेकयैव गाथया समभ्यधिकम्। न च वक्तव्यानुरूप्येण स्वभावत एव तथा बन्धः समजनि,

"निसुणह एगग्गमणा होउमियाणिं कहं कहिज्जंतं।
अड्ढाइज्जसएहिं गाहाणं कयपरिच्छेयं॥ ४४॥"

इत्यनयार्यया ग्रन्थारम्भ एव तादृशकर्तव्यतां प्रतिजानानस्य ग्रन्थकारस्य तत्र साभिप्रायत्वाभिव्यक्तेः। एवं नियतशब्दाधीनेऽपि विधातव्ये निबन्धे कविना निपुणं निजकवित्वशक्तिमुपयुञ्जानेन तथात्र समाचारि, यथा न समासि विस्तरार्हवक्तव्यं वस्तु, न च व्यासि संक्षेपापेक्षि वर्णनीयम्, नाप्यदायि काव्यप्राणभूतरसापकर्षस्य लेशोऽप्यवकाशः, पर्यचापि चैवमपूर्वमात्मीयं कवित्वकौशलं सहृदयानामिति विनोक्त्वा न शक्यतेऽवस्थानमाधातुम्।

काव्यत्वमस्योपपद्यते नवा? इति मीमांसायां पुनः "अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम्" इति काव्यानुशासने हेमचन्द्राचार्योक्तस्य,

"साधुशब्दार्थसंदर्भं गुणालङ्कारभूषितम्।
स्फुटरीतिरसोपेतं काव्यम्"

---

१ अनेकान्तजयपताकादिन्यायविषकग्रन्थेषु। २ यदाह हेमसूरिर्निजविवेके "सकलकथा=चरितमित्यर्थः" इति (पृ० ३४०)।

इति वाग्भटालंकारे वाग्भटैकविकथितस्य,

"निर्दोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम् ।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति ॥"

इति सरस्वतीकण्ठाभरणे भोजदेवप्रणीतस्य,

"निर्दोषा लक्षणवती सरीतिर्गुणभूषिता ।
सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक् ॥"

इति चन्द्रालोके पीयूषवर्षसमुदीरितस्य,

"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि"

इति काव्यप्रकाशे मम्मटभट्टभणितस्य, "काव्यशब्दोऽयं गुणालंकारयुक्तयोः शब्दार्थयोर्वर्तते" इति काव्यालंकारवृत्तौ वामनसमाम्नातस्य, "ध्वन्यात्मकं वाक्यं काव्यम्" इति व्यक्तिविवेके महिमभट्टनिर्मितस्य, एवमेव प्रभाकरादिप्रणीतस्य च काव्यसामान्यलक्षणस्यात्र क्वाचित्क्यामेव संगतावपि; "रमणीयार्थप्रतिपादकः शब्दः काव्यम्" इति रसगङ्गाधरे पण्डितजगन्नाथग्रथितस्य, "वाक्यं रसात्मकं काव्यम्" इति साहित्यदर्पणे विश्वनाथकविराजविरचितस्य, "शरीरं (काव्यम्) तावदिष्टार्थव्यवच्छिन्ना पदावली ।" इति काव्यादर्शे दण्डिकविसंगीर्णस्य, "रसालंकारोपेतं सुखविशेषसाधनं वा काव्यम्" इत्यलङ्कारशेखरे केशवमिश्रनिबद्धस्य, "काव्यं रसादिमद् वाक्यम्" इत्यलंकारसूत्रकारिकाग्रन्थे शौद्धोदनिविहितस्य च तस्य (काव्यसामान्यलक्षणस्य) समन्वयेन सुशकं काव्यत्वमे-

---

१ या तु काव्यप्रकाशटीकाप्रस्तावनायां वामनाचार्यस्य "वाभटमेव वाग्भट इति नाम्ना केचित् क्वचिद् व्यवहरन्ति । वस्तुतस्तु द्वौ भिन्नावेव, वाग्भट(ट ?)स्य काव्यानुशासनाख्यग्रन्थकर्तृत्वात्" इत्युक्तिः; सा चिन्त्या, वाग्भटालङ्कार-काव्यानुशासनयोरेककर्तृकत्वे कस्यापि बाधकस्यासंभवात्, एकतरग्रन्थनैष्फल्यस्याप्यापादयितुमशक्तत्वात्, द्वयोरपि प्रतिपाद्यस्य विषयस्याधिकारिणश्च भिन्नभिन्नतया यथायोगं चारितार्थ्यात्, एकेनापि कर्त्राऽधिकार्यादिभेदेनैकविषयाणामनेकग्रन्थानां विरचनाया भूयः समुपलम्भात्, तद्ग्रन्थोल्लेखतः; तट्टीकातश्च द्वयोरेकस्य वाग्भटमन्त्रिणः कर्तृतायाः संवादस्याप्यासादनाच्च ।

तस्य संगरितुम्; समुचितानां तूक्तसमग्रलक्षणानामेकत्र सर्वाङ्गीणाव्याभिचारस्यान्यत्र प्रसिद्धकाव्यग्रन्थेष्वपि सुसूक्ष्ममीक्ष्यमाणेष्वनीक्षणात्, तत्रापि नित्यानित्यान्यतमदूषणदुष्टत्वस्य क्वाचित्कस्य सार्वत्रिकस्य वा समुपलम्भेन, रमणीयार्थप्रतिपादकत्व-व्यङ्ग्यार्थकत्व-रसात्मकत्वादेस्त्वत्रापि सद्भावेन च तुल्ययोगक्षेमत्वादिति ।

एवं काव्यतत्त्वविभूषितश्च प्रस्तुतो ग्रन्थः "पद्यं प्रायः संस्कृतप्राकृतापभ्रंशग्राम्यभाषानिबद्धभिन्नान्त्यवृत्तसर्गाश्वाससन्ध्यवस्कन्धकबन्धं सत्संधि शब्दार्थवैचित्र्योपेतं महाकाव्यम्" इति काव्यानुशासने हेमचन्द्रेण सूरिधुरीणेन (पृ० ३३०),

"सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ।
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ॥
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसंधयः ।
इतिहासोद्भवं वृत्तमन्यद् वा सज्जनाश्रयम् ॥
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत् ।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ॥
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम् ।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ॥
नातिस्वल्पा नातिदीर्घा सर्गा अष्टाधिका इह ।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ॥
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।
सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः ॥
प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः ।
संभोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ॥
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ॥
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ।
नामास्य, सर्गोपादेयकथया सर्गनाम तु ॥
अस्मिन्नार्षे पुनः सर्गा भवन्त्याख्यानसंज्ञकाः ।
प्राकृतैर्निर्मिते तस्मिन् सर्गा आश्वाससंज्ञकाः ॥"

इति साहित्यदर्पणे विश्वनाथकविना चाभिदधानं महाकाव्यस्वरूपं काव्यविशेषलक्षणमपि न व्यभिचरति, नायकोपलक्षितधीरोदात्तगुणधारिनायिकाशालित्वात्, शान्तरसप्रधानत्वात्, अन्यरसानामप्यङ्गभावेन यथास्थानमाधानात्, मुखप्रतिमुखादीनां चतुष्पञ्चानां[1] संधीनां यथासंभवं विनिवेशनात्, चतुर्वर्गाग्रणीभूतस्य मोक्षवर्गस्योपादेयतयाऽभिव्यञ्जनात्, नमस्कारात्मकमङ्गल-सज्जनाभिवन्दन-दुर्जननिन्दनाऽऽदिकत्वात्, भिन्नान्त्यवृत्तोपेतसमानजातीयपद्यबद्धत्वात्[2], चतुर्वर्गासन्नोपकारितया कवितृभिर्नियमतः प्रयोज्यानां मन्त्रदूतरणप्रयाणनायकाभ्युदयादीनामृतूद्यानजलकेलिरतोत्सवादीनां चाखिलानामपि, तदितरेषां च नगनगराश्रमसन्ध्यासवितृसमुदयास्ततमस्तमातमाकरसरःसरस्वतीपतिविवाहवाहनवनविहारादीनां विकल्पप्रयोज्यत्वेन[3] साहित्यविद्भिः सिद्धान्तितानां वर्णनीयवस्तूनामलंकारादिगुणगणगुम्फितया श्रुतिमधुरया ललितया वचनविरचनया यथोचितमुपवर्णनात्, नायिकानाम्नाग्रन्थाभिधानस्य, उपादेयकथाभिश्च परिच्छेदनाम्नां निर्देशात्, अवान्तरार्थदर्शनैराश्वासस्थानापन्नैः[4] परिच्छेदैर्निबद्धत्वात्, असंक्षिप्तग्रन्थत्वात्, सरसस्फुटप्रसादगुणप्रधानबन्धबन्धुरत्वात्, प्रयोजनाद्युपदर्शनात्, लाटानुप्रास-यमक-श्लेषादिदुष्करालंकार-

---

१ भरतमुन्यादिमते मुख-प्रतिमुख-गर्भ-विमर्शाश्चत्वारः संधयः (अलङ्कारचूडा० पृ० ३३१।) दर्पणकारादिनये तूपसंहृतिपञ्चमकाः पञ्च त इति [पृ० २३९]। २ क्वचिदन्तरान्तराऽन्यच्छन्दोनिबन्धः प्रायोग्रहणात् क्वचिदग्रहणाच्च न दुष्यति। ३ हेमचन्द्रविवेके पृ० ३३७। ४ लक्षणे प्रायोग्रहणादेव संस्कृतभाषानिबद्धेऽपि हरिप्रबन्धादौ सर्गस्थानीयाश्वासबन्धवत्, प्राकृतेऽपि प्राकृतग्रन्थे परिच्छेदनामनिबन्धो न दोषावहः (अलङ्कारचूडा० पृ० ३३७)। ५, परि० ३-५२; ९—२०३, २०४, २०५, २०६, १०—३, ४, ५; १०—१८५, १८६, १८७; १०—२३३, २३४; ११—१७१, १७२, १७३, १७४, १७५, १७६; १३—४१, ४२, ४३, ४४ इत्यादिकासु गाथासु।

समलंकृतत्वात्, ग्रन्थकृन्नामाङ्कितसमाप्तिकत्वात्; रसभावनैरन्तर्यस्य, विधिनिषेधव्युत्पादकत्वस्य, सुसूत्रसंविधानकत्वस्य, अन्यस्य चार्थवैचित्र्यस्य; रसानुरूपसंदर्भ-कथान्तरानुषङ्गनादेरुभयवैचित्र्यस्य च बाढमुपलम्भाच्च ।

सत्यप्येवं गुणविसरविराजिनि प्रतुतपुस्तके, अमृतमय इव मकराकरे कालकूटकणस्य, न दूषणगणस्याप्यसद्भावः, तथाहि;—

"गब्भस्स य गरुयत्ता भयवेविरओ सरीरस्स" (१०–११९)

इत्यत्र भावप्रत्ययस्य त्वतलादेरवश्यप्रयोज्यस्य च्छन्दआनुलोम्यपरिरक्षणायाप्रयोगो व्याकरणदोषः, त्वतलाद्यभावे हि 'सरीरस्स' इत्यत्र षष्ठ्याः, 'वेविरओ' इति पञ्चम्यर्थकतसोर्वाऽनुपपत्तिः, समानाधिकरणत्वात् ।

" जणणीसमयं मरिही गयणाओ निवडिओ वइरी " (१९-१९)

अत्र समयशब्दस्य समस्तीभावः शब्दशास्त्रनिषिद्धः ।

" एवं हि कए अहवा न होज्ज वियणा पभूयकालीया " [१९-२४]

इह कालशब्दात् तद्धितीयस्य 'इकण्प्रत्ययस्य (सिद्ध० ६, ३, ८०) स्थाने ईयस्य प्रयोगो न व्याकरणानुकूलतामाभजते ।

" आजम्मंपि कलंकं सुदूसहं होई ता मज्झ " (६-१९८)

इत्यादाविव शुद्धप्रयोगे प्रयोजनीये

" दुसहं विओयदुक्खं संजायं तुम्ह दोण्हंपि " (८-२३९)

" जलभरियसरवराइंवि महिनिवडियछत्तसरिसाइं " (१०-१७९)

इतिप्रभृतिप्रयोगो नहि शब्दानुशासननियमयोः (H. P. I. 13—41) प्रतिपन्थितां न समश्नुते ।

पादादाववश्यविधेयाया यतेः

" पाउसनरिंदनवसंगमम्मि जायम्मि भूमिमहिलाए " (२—८८)

"मह आगमेवि पियविरहियाण महिलाण किं न फुट्टाइं ।" (२-९०)

"पवणाहयधयवडचंचला उ लच्छीउ तहय मणुयाणं ।" (४-७६)

इत्यादावकरणं च च्छन्दःशास्त्रीयो दोषः ।

" किसलयरइयम्मी सत्थरे संनिविट्ठो ।" (४-२४८)

" अह उवचियगब्भा पूरिए दोहलम्मी

पसवणसमयम्मी आगयम्मी सुहेण ।
सुहगहनिवहम्मी उच्चठाणट्ठियम्मी " (९-२४८)
" अइवेगओ करिस्सा अदक्खयाए य इत्थिभावस्स " (१०-११९)

इत्यादिषु सप्तम्येकवचनान्ते (H. P. III. II) **ह्रस्वे प्रयोक्तव्ये छन्दःपूरणार्थं दीर्घीकरणं पदैकदेशाधिकत्वम्[1],**

"नाउं मह आगमणं तहवि हु किं चलिया पिया मोत्तुं" (२-९१)
"जइवि हु कन्ना, पिययम ! सज्झसभरिया न सक्कए कहवि ।
मणवल्लहस्स पुरओ एक्कंपि हु वयणमुल्लविउं ॥ (७-१६१)
"अइभीसणेण बंधेण गरुयपीडावहो खु जीवाणं ।
मिच्छावियप्पवसओ सव्वंपि हु सोक्खमाभाइ ॥" (४-७८)
"ताव य विज्जुचमुक्कारणंतरं चंडचडडसंसद्दो ।" (२-११०)
"एवं विचिंतिऊण अवहरिओ धणवई इमेणं तु ।
नेऊण भरहखित्ते मुक्को उ विणीयनयरीए ॥" (६-१९३)

इत्यादिषु 'हु खु य उ चिय'-प्रभृतीनां निपातानां पूरणार्थमेव प्रयुक्ततया कविशक्तिदौर्बल्यमावेदयतां निरर्थमिह निर्दिष्टत्वेन पदाधिकत्वम्[2],

"मिलिओ य भूरिलोगो किं किं एयंति एवं जंपंतो ।" (६-१६७)
"कयत्थमप्पाणं मणे गणंतो जहागयं ताहि गओ सठाणयं ।" (१४-२४८)

इत्यादौ न्यूनपदांशत्वम्[3],

"किंवा सो मणदइओ हविज्ज निहओ इमेण पावेण ।
सोच्चिय दइओ अन्नो पडिहासइ किं विवज्जासो ? ॥" (६-१५४)

इतिप्रभृतिषु न्यूनपदत्वमुक्तपदत्वं च,

"दुज्जणसहावे पडियं निम्मलकव्वंपि लहइ न पइट्ठं ।
जलबिंदुव्व सुतत्ते आयसभाणम्मि पक्खित्तो ॥" (१-२३)

इत्यादावुपमानोपमेययोर्भिन्नलिङ्गत्वेनानैक्यान्वितत्वम्[4], एवम-

---

१ अलङ्कारचूड़ामणौ पृ० १३६ । २ अत्र हि 'एवं' इति प्रयोक्तव्ये वृत्तबन्धानुलोम्यायानुस्वाररूपस्य पदांशस्य लोपो विहितः । न च लेखाशुद्धिः, मात्राधिक्यप्रसङ्गेन च्छन्दोदोषापत्तेः । ३ इह 'अप्पाणं' इति युक्ते निर्देशे 'अप्पाण' इति न्यूनपदांशः पाठः । ४ अलङ्कारचूड़ामणौ पृ० १३८।५ अत्र विकल्पार्थद्योतकस्य वाशब्दस्यावश्यवाच्यत्वेऽप्यनुक्तिः । ६ चूड़ामणौ पृ० १४३ । ७ अलङ्कारचूडामणौ पृ० १५४ ।

प्रधानस्याप्यङ्गस्यातिविस्तरेण वर्णनं चेतिप्रभृतयः साहित्यसमयसमाम्नाता दोषाश्चेति।

यद्यप्युक्तव्याकरणदोषेषु प्रथमस्य भावप्रधाननिर्देशत्वेन, अन्येषां च प्राकृतभाषानियमनिवहस्य सर्वस्यापि "बहुलम्" (H. P. I. 2.) सूत्रज्ञापितेनावश्यंभावाभावेन, यतिभङ्गात्मकस्य च्छन्दोदूषणस्यापि कैश्चिद्[1] दोषरूपतयानभ्युपगतत्वेन; साहित्यशास्त्रीयदोषाणां चोपदर्शितानां मध्ये केषाञ्चिदनित्यत्वेन, केषाञ्चित् कैश्चिद्[2] दोषात्मकतयानङ्गीकृतत्वेन, केषाञ्चिन्निरोधस्यैव प्रायोऽशक्यतयाऽवश्यमापातेन, अवशिष्टानां च कवितू रभसप्रवृत्त्या निरङ्कुशतया वा प्रयुक्तानां क्षमणीयत्वेन च भवति सर्वेषामप्युपर्युक्तदूषणानां परिहारः, द्रविडप्राणायामवत् कृच्छ्रसाध्यतयाऽरुचिग्रस्ततया च सहृदयहृदयानां हृदयङ्गमतां तु नैवावहतीति। न चैवंविधदूषणानामिहैवोपनिपातो नयनगोचरीभवतीत्यवधारणीयम्, एतत्प्राग्वार्तिष्ववाग्भवेषु च सर्वेष्वप्येतज्जातीयग्रन्थेषु तत्कृतां कविवराणां प्रमादशब्दाभिधेयस्यैवंविधप्रवर्तनस्याल्पस्याधिकस्य वोपलम्भात्। अतएव सुष्ठूक्तं कविनापि सता सतां धुरीणेन सूरिणा श्रीनयचन्द्रेण निजे हम्मीरमहाकाव्ये;—

"प्रायोऽपशब्दादिकृतोऽपि दोषो न चिन्तनीयो मम मन्दबुद्धेः।
न कालिदासादिभिरप्यपास्तो योऽध्वा कथं वा तमहं त्यजामि ? ॥"

इत्यलं, समालोचनायामवश्यदर्शनीयं वस्तुसन्तमपि प्राच्यग्रन्थदोषनिकरं प्रकाशयन्तं विद्विषतां, प्राक्तनग्रन्थकृत्त्वावच्छिन्नेषु स्वमतावलम्बिषु ग्रन्थकृत्सु सूरिषु प्रमादप्रकृतिकं मानुष्यमङ्गी-

---

१ यथा धनदेव-सुप्रतिष्ठ-चित्रवेगादिवृत्तान्तानां गुणीभूतानामपि प्रथमसर्गादारभ्या दशमं तमतिविस्तरेणोपवर्णनम्। २ स्पष्टमेतच्छन्दोमञ्जर्यां पृ० ३८। ३. तथा च कविर्वाग्भटो निजे वाग्भटालङ्कारनामनि ग्रन्थे "बुधाः क्वापि लिङ्गभेदं तु मेनिरे" इत्यनेन विदुषां तादृशं मतमुपदर्शितवान् पृ० ४२। ४ अत एव पूर्वसूरिभिः काव्यलक्षणे निवेशितं निर्दोषत्वविशेषणमर्वाचीनैर्विश्वनाथप्रभृतिभिः स्वग्रन्थेषु खण्डितम्।

कृत्यापि सर्वज्ञत्वं सर्वगुणसंपन्नत्वं चासन्तमप्यन्धश्रद्धाविषयीकुर्वतां निजं विपर्यस्तमतिविजृम्भितं वा वास्तवगुणानुरागविधुरत्वं वाऽऽविर्भावयतामिदानीन्तनानां कतिचित्पण्डितमानिनां व्यर्थकोपवृद्धेः कारणेन, आत्मदौर्जन्यख्यापनहेतुभूतेन चाधिकेनात्र दोषप्रादुष्करणप्रसङ्गेन ।

विद्यमानेऽप्युदीरितदूषणसमुदाये, कालिमनीव रजनीरमणस्य, कण्टकपटल इव च कमलनालस्य, अस्यामूलचूलं विविधरसातिशयं प्रस्रवतः, आकण्ठं सुमनसां मनस्सु मुदमादधतः, मधुरमधुरं हितमुपदिशतः, बहुविधं विज्ञेयवस्तुनिकुरम्बमवबोधयतः, सुविचारमसारभावपरिहारं शिक्षयतः, निपुणं नानाविधशास्त्रसमुचितोपादेयमुपवर्णयतः, एवं च सुधानिधिनिर्मलं निजनिर्मातुर्यशश्चयमधिजगत्त्रितयं प्रथयतश्च प्रस्तुतस्य ग्रन्थस्य न किञ्चिदूनमादेयत्वमवलोकयामः ।

प्राकृतभाषायां व्युत्पत्तिमभिलषतां सहैव च कथारसमपि निपिपासूनां जनानां ग्रन्थोऽयं महीयांसमुपकारमाधास्यति, निजमुद्धारं च विधास्यतीत्यवधृत्य मुद्रणमन्तरेण नास्य समुपलम्भः साधारणसुलभ इत्यवगत्य चास्य संशोधनकर्मणि व्यापृतोऽभवम्, यत्र प्रूफदर्शनादिसाहाय्यं वितीर्णवते, उत्तीर्णवते न्यायतीर्थ-व्याकरणतीर्थपदवीकयो राजकीयपरीक्षयोः, एतत्प्रसेधनभारमुद्वोढवते चास्मच्छिष्यान्यतमाय पण्डितहरगोवनदासाय शतशः प्रयच्छामि साधुवादान् ।

प्रासिद्धिकार्ये पुनरस्य द्रव्यसहायताविधायिनः—

"साणंदनिवासि शेठ धनजीभाई वखतचंद
पुण्यपत्तन (पूना) वास्तव्य शेठ कृष्णाजी वाल्हाज
,, शेठ भोगीलाल नगीनदास
,, शेठ धनजीभाई प्रेमचंद
,, शेठ कीसनदास प्रेमचंद
,, शेठ छगनलाल वखतचंद
,, शेठ छगनलाल गणपतदास

पूनानिवासि शेठ भीखणदास कीसनदास
,, शेठ बालचंद लाधाजी
,, ,, खेमचंद रूपाजी
,, ,, रतनचंद कृष्णाजी
,, ,, शंकरलाल मगनलाल
बेडकीहालनिवासि सेठ लालचन्द रावजीभाई
सुरतनिवासि झवेरी ठाकोरदास मोतीचंद
एखलावास्तव्य शेठ रूपचन्द चिंतामणदास
मोहमयीनिवासि शेठ साराभाई वीरचंद"

इतिप्रभृतयः श्रेष्ठिवर्या अपि भूयसां धन्यवादानां पात्रम्, ये सुकृतप्राप्तां निजश्रियं सुकृतवर्त्मन्येवोपयोज्यात्मनः कृतज्ञतामावेदयन्तश्चञ्चलायास्ततोऽचलसुखसाधनमेतद्ग्रन्थवितरणविनिश्चयमकार्षुः ।

संशोधनकर्मणि ग्रन्थस्यास्यादर्शपुस्तकद्वितयमुपयुक्तम्, यत्र

१ A संज्ञकम्, मदीयम्, नातिशुद्धम्, ७० पत्रात्मकम्, विक्रमात् १४६७ तमे वर्षे लिखितमिति प्रत्नतरम्, यस्य लिपिर्नागरी जैनी, यत्र एकार-पकारयोः, उवर्ण-ओवर्णयोः, घ-थयोः, च-ब-वानां, च्छ-त्थयोः, ज्झ-ब्भयोः, ट्ट-ड्डयोः, ट्ट-ड्डयोः, ट्ट-द्धानां च वर्णानामस्पष्ट एव लिपिभेदः, प्रतीयमानेऽपि भेदे बहुधा विपर्ययश्च, यथा प्रायः सर्वास्वन्यग्रन्थसंबधिनीष्वप्यार्हतालिपिमयीष्वादर्शप्रतिष्वनुभूयते, यस्मिंश्च प्रतिपत्रद्वयं प्रतितत्त्रयं वा सर्वत्र परिगणिताक्षरमिव सार्धगाथाद्वितयीपरिमितं ग्रन्थभागमनुद्धरता लेखकेनानुकार्यादर्शस्यैकैकाऽखण्डा पङ्क्तिरेव प्रमादवशतोऽन्यत्रासक्तस्वस्वान्तत्वतो वा परित्यक्तेत्यनुमीयते ।

२ B नामकम्, प्रातःस्मरणीयप्रवर्तकमहाराजश्रीकान्तिविजयपादानाम्, नातिशुद्धम्, अष्टसप्तति ७८ पत्रात्मकम्, लेखककालोल्लेखसमुज्झितमप्याकारदर्शनेनानुमेयप्राचीनतम्, प्रथमादर्श इव स्फुटतयाऽपरिच्छेद्योक्तवर्णविभेद-वर्णविपरीततांकम्, 'ओ ख क्ख ग ग्ग ह्न' इत्येतेषां स्थाने प्रायः सर्वत्रानुक्रमं 'उ ष ष्य ग्र ग्र ह्न' इतिवर्णलेखसंकलितम्, क्वचित् क्वचिल्लेख-

स्थानाद् बाह्यभागे विभिन्नहस्तीयवर्णेषु लिपीकृतेन संस्कृतपर्यायमयेन, क्वचिच्च तुल्यार्थकप्राच्यमरु-गुर्जरदेशीयमिश्रभाषाशब्दशालिना टिप्पणेन च समलङ्कृतम् । लघिष्ठमपि टिप्पणमिदमनुपयोगिबहुंशम्, क्वचिदत्यशुद्धमपि; तथा च कतिचिदशुद्धिनिदर्शनानि,

" अब्भत्थणारिहा जं सुयणा, तो ते उ पत्थिमो इण्हि " (१--३०)

अत्र 'सुयणा' इत्यस्य प्रथमाविभक्त्यन्तस्य "हे सुजनाः" इति संबोधनावबोधकमर्थानन्वयदोषसमाक्रान्तं टिप्पणम्,

" नहवाहणोवि एसो पट्ठिविलग्गो इमस्स एइत्ति ।
ताहे करेमि किंचिवि उवगारं पुव्वमित्तस्स ॥ " (९--८)

इह 'ताहे' इति तर्हिस्थानीयमखण्डमपि पदं 'ता हे' इति विश्लिष्टम्, न चैषोऽर्थोऽत्र प्रकरणसंबद्धः,

" तत्तो य पइदिणं सो उवयरइ ममं असुहभावो " (११--७२)

एतस्मिन् पादार्धे 'उवयरइ' इत्यस्य 'उपचरति' इति टिप्पनीये 'कथापयति' इति टिप्पितम्,

" अवरुंडइ सहिनिवहं उचं संलवइ हसइ अनिमित्तं " (३-१८२)

इह 'अवरुंडइ' इत्यस्य देश्यस्य 'परिरभते' इत्युचितार्थं (H. D. I. 11) अनिर्दिश्य 'अवगणयति' इति टीकितम्,

" सामिय ! कीस ससंको अरइपरद्धोव्व दीससि तुमंति । " (७-४)

अस्मिन् 'परद्ध' इत्यस्य देशीशब्दस्य (H. D. VI. 70) पीडितार्थकस्य 'प्रारब्ध' इति संस्कृतपर्यायनिर्देशनम्,

" अणहसरीरा एसा जं तुमए मज्झ उवणीया " (९-१२४)

अत्रापि 'अणह' इति देश्यशब्दस्य 'अक्षत' इत्यर्थकस्य (H. D. I. 13) 'अनघ' इति संस्कृतरूपं प्रकरणार्थासंबद्धं टिप्पणम्,

" फुडमाणंपि न फुट्टं मन्ने तद्दंसणासाए" (३-२४३)

इह च 'फुडमाणं' इत्यस्य 'स्फुटमानं' इति संस्कृतरूपं व्या-

करणदोषदूषितम्, 'स्फुटत्' इति तु युक्तम्, परस्मैपदत्वात् स्फुटधातोः,

"अन्ने चिंतेंति मणे नियंति अन्नं घडेंति अन्नेण" (८-१५४)

इत्यत्रापि 'नियंति' इत्यस्य 'पश्यन्ति' इत्यनुरूपे पर्याये (H. P. IV. 181) करणीये 'प्रेक्षन्ति' इत्यर्थतः शुद्धमप्यशुद्धसंस्कृतम्, आत्मनेपदत्वादीक्षेः। एवं कर्तुः क्वचिदर्थाज्ञानसूचकम्, क्वचन देश्यशब्दार्थानवबोधविज्ञापकम्, कुत्रचन व्याकरणानुपस्थितिविनिवेदकं च टिप्पणमिदं केनचनाभ्यसनावस्थावर्तिना विहितमिति विज्ञायते। ईदृशस्याप्यस्य टिप्पणस्य कश्चिदंशं केनचिदंशेनोपयुक्तं विजानानस्तादृशाक्षरमेव तादृह स्वीयटिप्पणेऽवातारिषमिति।

अस्मिंश्चादर्शपुस्तके तत्तत्स्थलेषु "युग्मम्" "तिसृभिः कुलकम्" "चतसृभिः कलापकम्" "पंचभिः कुलकम्" इत्यादिः A संज्ञकादर्शानुपलभ्यमानः समुपलभ्यतेऽधिकः पाठः। स च ग्रन्थकारपश्चाद्भवेन केनापि प्राक्षिप्त इत्यवगम्यते; अन्यथा 'एवं च ठिए" "अन्नं च" "अविय" इत्यादिगद्यपदानामिवैतेषामपि प्राकृतभाषायामेवोपलम्भसंभवात्, गउडवह-कुमारपालचरियप्रभृतिष्वेवंविधेषु ग्रन्थेषु मूलकारेण युग्मादीनामनभिधानात्, तेष्वपि (गउडवहादिषु ग्रन्थेषु) तेषां (युग्मादीनां) टीकाकारैरेव निर्देशात्; ग्रन्थकारोपज्ञत्वे पुनः प्राचीनतरप्रथमादर्शपुस्तकेऽवश्यं तादृशपाठस्योपलब्धिप्रसङ्गात्, तत्र च तदनासादनस्याधुनैवोक्तत्वाच्च। अतएव तादृशपाठं मूलग्रन्थेऽनिवेश्य टिप्पण्यामेवातिष्ठिपम्।

एवं च प्रतिद्वयाधारेण संपादितम्, शुद्धिपत्रादिविभूषितम्,

---

१ एतच्चायुक्तम्, त्रिभिश्छन्दोभिर्वाक्यासमाप्तौ विशेषकसंज्ञानस्यैवाभीष्टत्वात्; यदाहुः—"एकद्वित्रिचतुश्छन्दोभिर्मुक्तक-संदानितक-विशेषक-कलापकानि" (काव्यानु० पृ० ३४०) इति,

"द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम्।
कलापकं चतुर्भिः स्यात् तदूर्ध्वं कुलकं स्मृतम्॥"

इति च। (काव्यप्र० टी० पृ० १८६)।

विषमस्थानेषु टिप्पण्या निष्टङ्कितार्थसार्थं च कथाग्रन्थमिममा-
प्रारम्भपर्यन्तमवलोकयन्तामालोचकाः, मनोहृत्य निपीयन्ताम-
मन्दानन्दसन्दोहानिःस्यन्दिनं विविधरसनिवहं सहृदयाः, सततं
समभ्यस्यन्तां प्राकृतव्युत्पत्तिमभीप्सवश्छात्राः, नयतामेवं परिश्र-
ममेनं मामकीनं फलेग्रहिताम्, क्षमन्तां मम निसर्गोपनिपाता मानु-
ष्यसहकृताः स्खलनाः, उपेक्षन्तां च मुद्रणयन्त्रसंजातास्तन्नियुक्त-
जनसमारचिता वा मात्रानुस्वाराङ्कादिपतनपरिवर्तनादीरवश्य-
मापतन्तीरशुद्धीरिति—

पुण्यपत्तने
संवत् १९७२ चैत्रकृष्णदशम्यां गुरुवासरे
ता० २७-४-१९१६ ।

प्रार्थयते
राजविजयः ।

विषयानुक्रमणिका ।

पृष्ठाङ्कः विषयः ।

प्रथमः परिच्छेदः ।

१ मङ्गलाचरणम् । अभिधेयनिर्देशः । सज्जन-दुर्जनयोः स्तुति-निन्दे । धर्मप्रवृत्त्युपदेशः । ग्रन्थस्य सरलतायां, प्राकृत-भाषानिबन्धे च प्रयोजनं च ।

४ ग्रन्थारम्भः । तिर्यग्लोक-जम्बूद्वीप-कुरुदेश-हस्तिनापुर—अमरकेतुनृपवर्णनानि । चित्रकरस्य राजसभायां प्रवेशः । कन्याचित्रप्रदर्शनम् । तद्दर्शनाद्राज्ञो मोहोत्पत्तिः । कन्या-स्थान-कुलादिवृत्तान्तपृच्छोत्तरे । विवाहादि च ।

१३ धनदेवश्रेष्ठिनः कुलजन्मादिव्यावर्णनम् । धूर्तयोगिभ्यां सकाशात् पल्लीपतिसुप्रतिष्ठबालस्य सदेवशर्माख्यबाल-पालकस्य लक्षद्रव्येण परिमोचनम् । तदौदार्यविख्यातिः । पितृद्रव्योपभोगोपालम्भश्रवणासहने । द्रव्योपार्जनाय सह सार्थेन विदेशे धनदेवस्य पर्याणम् । अटवीप्रवेशश्च ।

द्वितीयः परिच्छेदः ।

१९ अटव्यां सार्थे भिल्लधाटीपतनम् । भिल्लानां क्रूरताया वर्णनम् । सार्थस्येतस्ततः पलायनम् । धनदेवस्य भिल्लैर्युद्धम् । धनदेवपराजयः । भिल्लैस्तं गृहीत्वा पल्लीपतेः समर्पणम् । देवशर्मणो धनदेवपरिज्ञानम् । पल्लीपतये तन्निवेदनम् । धनदेवस्य निजपल्ल्यां नयनम्, आतिथ्यविधानादि च ।

२४ धनदेवस्य भिल्लपतिचरित्रपृच्छा । भिल्लपतिना तत्प्रति-वचनरूपं 'स्वस्य राजकुलजन्मत आरभ्य स्वमातृमरण-पित्रन्यकन्यापाणिग्रहण-तदासक्ति-स्वावमानना—यौवरा-ज्यपरित्यागादिगर्भं पल्लीपतित्ववृत्तिस्वीकारपर्यन्तं स्व-वृत्तान्तनिवेदनं च ।

३५ धनदेवस्य गमनानुज्ञा । पल्लीपतिना तदा दिव्यमणेः सम-

पृष्ठाङ्कः विषयः।

र्पणम् । एतादृशदिव्यमणेर्मनुष्यलोकासंभविनः कथं भवतां प्राप्तिरिति धनदेवस्य सुप्रतिष्ठं प्रति प्रश्नश्च ।

३६ सुप्रतिष्ठस्य मणिप्राप्तिवृत्तान्तनिवेदनोपक्रमः । तत्र सुप्रतिष्ठस्य वने मृगयार्थं गमनम् । तत्र सर्पोपद्रवाक्रान्तविद्याधराक्रन्दश्रवणम् । तच्चूडास्थमणिनोपद्रवनाशनं चेति ।

तृतीयः परिच्छेदः ।

३९ विद्याधरवृत्तान्तस्य सुप्रतिष्ठकृता जिज्ञासा । तन्निवेदनारम्भः । तत्र— वैताढ्यवर्णनम् । रत्नसंचयनगरवर्णनम् । निजमातापितृस्वजन्मादिव्यावर्णनम् । चित्रवेग इति निजाभिधानम् । विद्याभ्यासादि । सिद्धायतनयात्रामहोत्सववर्णनम् । वसन्तर्तुवर्णनम् । यात्रायां, ततः मातुलसुतेन सह कुञ्जरावर्तपुरे गमनं च ।

४५ मदनत्रयोदशीमहोत्सव-मदनमन्दिरादिवर्णनम् । तत्र कनकमालादर्शनम् । चित्रवेग-कनकमालयोर्दृष्टिमेलः । मोहोत्पत्तिः । उभयोर्दासीद्वारा वृत्तज्ञापन-पत्रादिप्रेषणानयन-प्रेमदार्ढ्य-सूर्यास्तादिव्यावर्णनम् । विरहाग्निपीडावर्णनम् । सूर्योदयवर्णनम् । परिच्छेदसमाप्तिः ।

चतुर्थः परिच्छेदः ।

५७ कनकमालाया नभोवाहनेन सह वरणस्य महोत्सवः चित्रवेगमूर्च्छा । दैवोपालम्भः । पूर्वमेव कनकमालापित्रा नभोवाहनाय निजकन्यावितरणम् । तद्वृत्तान्तस्य दास्या चित्रवेगाय निवेदनारम्भः । तत्र—

६० अमितगतेर्गङ्गावर्तपुरे गमनम् । सुरवाहनमुनिसमवसरण केवलोत्पत्ति-देशनाश्रवण-कन्याभाविवर-प्रश्नोत्तरादि ।

६३ गन्धवाहनस्य स्वसुतनभोवाहनार्थं कनकमालायाऽऽज्ञा, तत्स्वीकार-लग्ननिर्धारण—स्वपुरागमन-स्वदयितातद्वृत्तज्ञापन-नभोवाहनकन्यावितरणाग्रहादिवर्णनम् ।

६६ कनकमालाया अभिलषितवरसिद्धिनिराशा । आत्महत्यो-

पृष्ठाङ्कः विषयः ।

द्यमः । देववाणी-समभीष्टभर्तृलाभज्ञापन-तदुपायप्रदर्शनादिवर्णनम् ।

७१ ततश्चित्रवेगस्याभीष्टसिद्ध्याशा । आशाया निराशायां परिवर्तनम् । आत्मवधोद्यमः । चित्रगतिना तत्रागमन-पाशच्छेद-स्वस्थीकरणादि । परिच्छेदान्तः ।

पञ्चमः परिच्छेदः ।

७५ चित्रगतेश्चित्रवेगवृत्तपृच्छा । प्रतिवचनम् । चित्रवेगवृत्तान्तारम्भः—नगर-मातापित्रादिवर्णनम् । निजमातृमातुलयोरन्योन्यं भाविस्वापत्यवीवाहकरणप्रतिज्ञा । मातुलराज्यप्राप्तिः । स्वभगिनी-मातुलसुतयोश्चित्रलेखा-ज्वलनप्रभयोः पाणिग्रहणम् । मातुलस्य प्रभञ्जनस्य दीक्षा । ज्वलनप्रभराज्यावाप्तिश्चेतिप्रभृतिवर्णनम् ।

७९ कनकप्रभस्य ज्येष्ठभ्रात्रा ज्वलनप्रभेण युद्धम् । ज्वलनप्रभपराजयः । ज्वलनप्रभस्य श्वशुरनगरे गमनम् । चित्रवेग-ज्वलनप्रभयोः शालकभगिनीपत्योः पुरबहिर्गमनम् । प्रभञ्जनमुनिकेवलोत्पत्ति—देशनाश्रवण-राज्यावाप्तिप्रश्नोत्तरादि ।

८१ द्वयोर्विद्याराधनाय गमनम् । तत्र निजभगिनीं कनकप्रभेणोपद्रूयमाणां दृष्ट्वा चित्रगतेस्तत्पृष्ठिधावनम् । कनकप्रभस्य निजनगरे आगत्य विद्यया चित्रवेगचित्तभ्रमकरणम् । ज्वलनप्रभस्य रोहिणीविद्यासिद्धिः । चित्रगतेर्विद्यामुखाद् वृत्तान्तश्रवणम् । तदानयनाय दमघोषप्रेषणम् । चित्रगतिस्वास्थ्यम् । द्वयोर्निजनगरे प्रस्थानम् ।

८४ मार्गे हस्तिकृतोपद्रवात् कन्यायाः परित्राणम् । कन्या-चित्रगत्योर्मिथःस्नेह-मुद्रार्पण-स्वस्थानगमनादि । चित्रगतेः कन्यापुरागमन-तत्पुरोद्वसताविलोकन-कारणपृच्छादि ।

८८ कनकप्रभराजस्य प्रमादाज्जिनभवनोन्मङ्जन-धरणेन्द्राक्रोश-तद्विद्याविनाश—पलायन—पुरलोकान्यान्यनगरगमनादिवृत्तान्तश्रवणम् । ततश्चित्रगतेर्विस्मय-विरहदुःख-कन्यागवेष-

पृष्ठाङ्कः विषयः ।

णान्यान्यपुरभ्रमण-चित्रवेगपाशच्छेद--मिथोनिजवृत्तख्यापन-कनकमालाप्राप्त्युपायप्रदर्शनवर्णनं च ।

षष्ठः परिच्छेदः ।

९२ द्वयोस्तयोर्मदनमन्दिरे प्रच्छन्नतया गमनम्, कनकमालायास्तत्रागमन--मकरध्वजसोपालम्भस्तवन--पाशबन्ध--मोचन-मिथोमेलनादिवर्णनम् । चित्रगतेः कनकमालावेषेण मदनमन्दिरान्निर्गमनादि । कनकमाला-चित्रवेगयो रत्नसंचयनगराभिमुखं प्रस्थानं च ।

९७ वर्त्मनि वननिकुञ्जे क्वचन तयोर्विश्रामकरणम्, तत्र स्वस्त्रिया चित्रगतेरापतनम्, चतुर्णामपि मेलन-संभाषणगोष्ठ्यादि, चित्रगतिस्त्रियाः प्रियङ्गुमञ्जर्या नगर-कुल-जन्मस्थानादिवृत्तव्यावर्णनोपक्रमश्च ।

१०२ प्रियङ्गुमञ्जर्या जातिस्मरणोत्पत्तिः, विस्तरेण चित्रगतिपूर्वभवसंबन्धगर्भं निजपूर्वभवयोर्मनुष्यदेवरूपयोर्मध्ये वसुमतीस्वरूपस्य मनुष्यभवस्य निरूपणम्, देवलोकप्राप्तिश्चेति ।

सप्तमः परिच्छेदः ।

११० देवच्यवन-देवीविलाप-केवलिदेशनाश्रवण-चित्रगत्युत्पत्तिस्थानदर्शनादिविषयकपर्यनुयोग-प्रतिवचन-सहितं प्रियङ्गुमञ्जर्या देवभवस्य व्यावर्णनम् ।

११४ प्रियङ्गुमञ्जरीप्रचलद्भवावशिष्टवृत्तोपदर्शनम्, तच्छ्रवणात् चित्रगतेर्जातिस्मरणज्ञानोत्पत्तिश्चेत्यादि ।

१२१ वननिकुञ्जात् सस्त्रीकचित्रगतेः सुरनन्दननगरे प्रस्थानम्, कनकमाला-चित्रवेगयोरपि ततः स्थानादुत्पतनम्, वर्त्मनि गच्छतोर्देवसाक्षात्कार--संभाषणनभोवाहनागमननिवेदन-तत्प्रेषितव्यविघातकविद्याप्रतिघातसमर्थदिव्यमणिसमर्पण-देवतिरोधानादिपर्युपाख्यानं च ।

अष्टमः परिच्छेदः ।

१२७ नभोवाहनस्य सबुभटादिसामग्रयस्य दूराद्विलोकनम्, कनकमालाभयविह्वलताक्रन्दनादि, चित्रगतिना तत्संधीरता-

पृष्ठाङ्कः विषयः।

पादनम्, नभोवाहनसमापतन-चित्रगतिनिर्भर्त्सन-बाणाग्नेयवारुणादिशस्त्रवर्षण-मणिप्रभावसंजनिततन्निष्फलतादिवर्णनगर्भितमन्ततो नागपाशविद्याह्वानमोचनतत्कृतविषोर्मिप्रभावसंजातचित्रवेगपतनपीडनमूर्च्छादि च।

१३२ सुप्रतिष्ठस्य तत्र गमनम्। चित्रवेगापत्तित्राणादिद्वितीयपरिच्छेदाधिकृतवृत्तान्तसमन्वयसंकलितं च देवस्य पुनरागमनम्। तदागमन-निजत्राणादिप्रयोजन-पूर्वभवसंबन्धादिचित्रगतिपर्यनुयोगस्य देवविहितं सर्वपरिचितपूर्वभवघटनावर्णनोपबृंहितं प्रतिवचनम्।

नवमः परिच्छेदः।

१४५ देवस्य घनवाहनमुन्युपसर्गनिवारण-मुनिकैवल्योत्पत्तिदेशनोपसर्गविधायकसुरपूर्ववैरवृत्तान्तस्वागामिभवविषयकदेवकृतप्रश्नकेवलिप्रतिकथनाद्युपवर्णनम्।

१५० चित्रवेगस्य स्वभार्याया नभोवाहनकृतापहारपश्चाद्भूतवृत्तान्तप्रश्नः। देवस्योत्तरम्। कनकमालां नभोवाहनादपहृत्य देवेन चित्रवेगाय समर्पणम्। चित्रवेगस्य कृतज्ञतानिवेदनम्। देवस्य वरग्रहणायाग्रहः। चित्रवेगाय विद्याधराधिपतित्वदानम्। देवान्तर्धानं चेत्यादि।

१५५ द्वितीयपरिच्छेदाधिकृतसुप्रतिष्ठधनदेवयोर्दिव्यमणिवृत्तोपसंहरणम्। धनदेवाय मणेः समर्पणम्। धनदेवस्याग्रे प्रस्थानम्। कुशाग्रपुरसंप्राप्तिः। श्रीदत्तधनदेवयोर्मिथोमैत्री, धनदेवस्य श्रीदत्तगृहे भोजनाय निमन्त्रणम्, तत्र श्रीकान्तादर्शन-स्नेह-प्राप्तीच्छादिवृत्तान्तोपकथनम्।

१५७ श्रीकान्तायाः कृष्णभुजङ्गदशनम्। नानोपायविधानम्। धनदेवेन दिव्यमणिप्रयोगेण तद्विषव्यपाकरणम्। धनदेवस्य श्रीकान्तापरिणयन-निजपुरप्रस्थान-मार्गस्थसीहगुहादाहविलोकन-देवशर्ममेलन-दाहवृत्तान्तश्रवण-देवशर्मदेवलोकाग्निस्वपुरागमन-श्रीकान्तापुत्रप्रसूत्यादिवर्णनं चेति।

पृष्ठाङ्कः विषयः ।

दशमः परिच्छेदः ।

१६३ पुत्रजन्मोत्सव-सराज्ञीकनृपनिमन्त्रण--नाम-विधान-राज्ञी-पुत्राभिवाञ्छा-सुताभावजन्यशोकादिवर्णनम् ।

१६६ राज्ञो देवाराधनम् । देवतासाक्षात्कारः । राज्ञीस्वप्नदर्शन-गर्भाधान--हस्त्यारोहणादिदोहदोत्पत्ति-तदपहारादि ।

१७३ नैमित्तिकागमन-राज्ञीविषयकप्रश्नोत्तर--नृपोत्तरदिक्प्रयाण-राज्ञीसमागमादिवर्णनम् ।

१७५ राज्ञ्या गजविहितनिजापहारादारभ्य निजवृत्तान्तनिवेदनारम्भः, तत्र हस्तिनो गगनोत्पतनम्, राज्ञ्या गगनात् सरोवरे पतनम्, सरोवरवर्णनम्, श्रीदत्तसमागमः, राज्ञ्यास्तेन कुशाग्रपुराभिगमनम्, वर्त्मनि भिल्लावस्कन्दः, राज्ञ्याः सार्थाद्वियोगः, अटवीभ्रमणम्, पुत्रप्रसूतिः, तदपहारश्चेति ।

एकादशः परिच्छेदः ।

१८१ राज्ञ्याः क्रन्दन-तापसीसमागमाश्वासन-स्वाश्रमनयनादि ।

१८४ अश्वहृतसुरथागमनम्, तेन कुलपतये निजवृत्तकथनम्, राज्ञ्यास्तेन सह स्वपुराभियानम्, मार्गे सुरथस्य राज्ञीशीलखण्डनोद्यमः, राज्ञ्याः पलाग्रनं कुर्वत्या कूपे पतनम्, तत्र निजपतिनृपस्य समागमश्चेतिप्रभृतिपरिवर्णनम् ।

१८९ उद्यद्याने नभस्तलात् सुरसुन्दर्याः पतनम्, उद्यानपालेन राज्ञे तन्निवेदनम्, राजपुरो तस्या नयनम्, राज्ञा तद्वृत्तपृच्छायां संक्षेपेण परिचयदानम्, राज्ञ्या दासीद्वारा विस्तरतस्तद्वृत्तान्ताधिगमनप्रयासः, सुरसुन्दर्या दास्यै स्ववृत्तनिवेदनोपक्रमश्चेत्यादि । तत्र—

१९३ स्वपुर-मातापितृ-कलाग्रहण-यौवनप्राप्त्यादिवर्णनम् । उद्याने प्रियंवदादर्शन-संभाषण--विस्मृतविद्यापदोपलम्भन-चित्रदर्शन-स्नेह-मूर्च्छा-सख्यालाप-प्रियंवदागमनादि ।

द्वादशः परिच्छेदः ।

१९९ सखीनां मिथो हास्यालापः । परिव्राजिकाया आगमनम् । तस्या आत्म-परलोकाभावादिसाधनगर्भनास्तिकतोपदेशः ।

पृष्ठाङ्कः विषयः ।

सुरसुन्दर्या युक्तिभिस्तत्खण्डनं चेत्यादिवर्णनम् ।

२०५ शत्रुञ्जयनृपस्य मन्त्रिद्वारा सुरसुन्दरीयाचना, नरवाहनेन तदनङ्गीकारः, द्वयोर्युद्धं च ।

२०७ रत्नद्वीपे सुरसुन्दर्यपहरणम्, अपहारकेण निजवृत्तनिवेदनम्, विद्याजापदानाय तस्य वंशजाल्यामवस्थानम्, सुरसुन्दर्या आत्मघाताय विषफलभक्षणम्, मूर्च्छा चेत्यादि ।

२१२ मकरकेतोर्वंशजालीच्छेदः, वृक्षाधः सुरसुन्दर्यवलोकनम्, विषापहरणम्, शत्रुञ्जयनृपवधाय युद्धे गमनम्, प्रियंवदया सह सुरसुन्दर्या तत्रावस्थानम्, वेतालेन पूर्ववैरिणा सुरसुन्दरीमपहृत्याकाशात् पातनं चेत्यादि ।

त्रयोदशः परिच्छेदः ।

२१७ मकरकेतुकृतशत्रुञ्जयनृपवधः । धनदेवस्य राजसभायामागमनम् । नृपपृच्छोत्तरं तेन स्वीयसिंहलद्वीपयात्रार्धभङ्गवर्णनप्रक्रमः । तत्र समुद्रे मकरकेतुसंगमः । धनदेवस्य तद्वृत्तजिज्ञासा । तत्कथनारम्भः । तत्र रत्नद्वीपे विद्यासाधन-सुरसुन्दरीविषापहार-रणप्रयाण-रिपुव्यापादनादिवर्णनम् । नभोमार्गेण रत्नद्वीपे प्रत्यावर्तमानस्य मध्ये पूर्ववैरिदेवेन वार्धौ पातनम् । बाहुभ्यां तत्तरणप्रक्रमश्चेति ।

२३० प्रवहणभङ्गः । धनदेवस्य फलकासादनम् । नीरधितीरे स्थितिः । देवसाक्षात्कारः । तेन देवशर्मभवावस्थितौ धनदेवकृतस्योपकारस्य स्मारणा, विविधरत्नवितरणम्, हस्तिनापुरे नयनं चेत्यादिवर्णनम् ।

चतुर्दशः परिच्छेदः ।

२३५ सुरसुन्दरी-कमलावतीविलापः । सुप्रतिष्ठसूरिसमवसरणम् । तदुपदेशमुखेन संसारासारता-नारकादिदुःखदौर्गत्यादिवर्णनम्, धर्मतत्त्वादिसंकीर्तनं च ।

२४१ राज्ञो मकरकेत्वपहरण-वृद्धि-सत्त्वादिवृत्तान्तानुयोगोत्तरं केवलिकृतं तदुत्तरम् । पूर्वभवादारभ्य तत्कालपर्यन्तं तद्विनिवेदनारम्भः ।

SOCIETY

पृष्ठाङ्कः विषयः।

पञ्चदशः परिच्छेदः।

२५२ प्रकृतसमाप्तिः। धनदेवस्य पत्नीभङ्गानन्तरजातसूरिवृत्तप्रश्नः। सूरेस्तन्निवेदनम्। प्रियंवदया समुद्रान्मकरकेतोरुद्धरणम्। तेन तस्यै स्ववृत्तशंसनम्। मकरकेतोः सुरसुन्दरीवृत्तजिज्ञासा, प्रियंवदया तद्विज्ञापनं च। धरणेन्द्रेण निजपूर्वचरित्रकथनपूर्वकं तस्मै विद्यावितरणं चेत्यादि।

२६२ आकाशमार्गेण मकरकेतोरागमनम्। महोत्सवेन तस्य पुरप्रवेशः। सर्वेषां मिथः समागमहर्षः। सुरसुन्दरीमकरकेतुविवाहः।

२६५ सूरिवन्दनायै नृपगमनम्। कमलावत्या निजपूर्वभवप्रश्नः। सूरिणा तज्ज्ञापनम्। चित्रवेगादीनां दीक्षाग्रहणं चेति।

षोडशः परिच्छेदः।

२६९ मकरकेतो राज्यशासनपटुतिः। शुभकृत्यानि। सुरसुन्दरीस्वप्नः। राज्ञः सभार्यस्य हिमवति गमनम्। तत्रोद्याने दम्पत्योः प्रश्नोत्तरविनोद-कृष्णसर्पदंश-विषापहाराः, गर्भाधानम्, पुत्रद्वयप्रसूतिः, युवराजविवाहश्च।

२७८ मदनवेगस्य दासीरूपेण नृपवधोद्यमः। राज्ञा तस्य कारागृहे क्षेपणम्। पर्युषणायां तन्मुक्तिः। पुना राजविघातचेष्टा। तत्रापि निष्फलता चेत्यादि।

२८१ चित्रवेगसूरिसमवसरणम्। राज्ञा मदनवेगस्य वैरनिमित्तं ज्ञातुमिच्छा। सूरिणा तदुत्तरदानम्। सुरसुन्दरीमकरकेतुप्रव्रज्योपादानं च।

२८३ चित्रगत्यपहारः। सूरिदेशना। मकरकेतुमुनेर्मुक्त्यवाप्तिः। सूरि-सुरसुन्दरीप्रभृतीनां केवलज्ञानोत्पत्तिः। सर्वेषां मोक्षप्राप्तिः। ग्रन्थकृल्लघुता। प्रशस्तिः। ग्रन्थसमाप्तिश्चेति॥

अर्हं

सुरसुन्दरी-चरिअं

सुह-सामन्न-पइन्ना-समय[1]-समारद्ध-लोय-कम्मस्स ।
अमरवइ-वयण-धरिओ परिकुडिलो कुंतल-कलावो ॥ १ ॥
कन्नासन्ने सोहइ जस्स अवत्थाण-पत्थणत्थंव ।
चित्तब्भंतर-रुद्ध-प्पवेस-कंदप्प-दूउव्व ॥ २ ॥

अहवा ।

सोहइ जस्स सुसंगय-उभयंस-लुलंत-कुंतल-कलावा ।
मुत्ती सुवन्न-वन्ना सकज्जलग्गव्व दीव-सिहा ॥ ३ ॥
जस्स पणामा पावइ पलयं पउरोवि विग्घ-संघाओ ।
तस्स रिसहस्स पढमं नमामि पय-पंकयं पयओ ॥ ४ ॥[3]
अजियाइणो जिणिंदे वंदे जम्मम्मि ज्झेसिममरिंदा ।
रागाइणो वि सत्तू [4]पंचत्तं पाविया समयं[5] ॥ ५ ॥
जम्मण-समयाणंतर-सुमेरु-सिहराभिसेय-समयम्मि ।
सक्किंदण[6]-कय-कुवियप्प-नासणे कय-पयत्तस्स ॥ ६ ॥
रागाइ-वइरि-सेणव्व जस्स दट्ठुं अणन्न-सामत्थं ।
थरहरिया[7] अचत्थं ससिलोच्चय[8]-सायरा वसुहा ॥ ७ ॥
निम्मल-कम-नह-नियरो पडिबिंबिय-पणय-तिहुअणो जस्स ।
उव्वहइ जाय-गव्वो केवलनाणस्स समसीसिं[9] ॥ ८ ॥
जस्स य पणाम-मेत्ता निम्मल-कम-णक्ख[10]-पडिय-पडिबिम्बा ।
एक्कारस-गुणमुवलब्भ अप्पयं हरिसिया तियसा ॥ ९ ॥
तं वंदे जिण-यंदं देविंद-नरिंद-विंद-वंदिययं ।
सिद्धत्थ-नरिंद-सुअं चरिमं चरिमं[11] गइं पत्तं ॥ १० ॥[12]

---

१ सामन्नं श्रामण्यम् । २ B मइ । ३ B चतसृभिः कलापकम् । ४ अमरेन्द्रपक्षे स्त्रीयपञ्चरूपत्वम्, जिनेश्वरजन्माभिषेकसमये चामरादिधारकतया सौवरूपपञ्चककरणस्य तेषामाचारात्; रागादिपक्षे पञ्चत्वं नाशः । ५ समकं युगपत् (V. A. B. 2442) ६ B सक्कंद° । ७ कम्पिता (H. D. V. 27) । ८ शिलोच्चयः पर्वतः । ९ समसीसी =स्पर्धा (H. D. VIII. 13) । १० B नक्ख । ११ चरमगतिर्मुक्तिः । १२ B पञ्चभिः कुलकम्

दुज्जय-अणंग-मायंग-भंग-सारंग[1]-पुंगव-सरिच्छे ।
सासय-सिव-सुह-सहिए सिद्धे सिरसा नमंसामि ॥ ११ ॥
दुद्धंस-धंत[2]-विद्धंस-धीर-सिद्धंत-देसए धीरे ।
पंचविहायार-रए सिरसा वंदामि आयरिए ॥ १२ ॥
विसय-सुह-निप्पिवासे संसार[3]-च्छेय-करण-तल्लिच्छे[4] ।
वंदामि उवज्झाए सुत्त-त्थ-विसारए सययं ॥ १३ ॥
पंच-महव्वय-दुव्वह-पव्वय-उव्वहण-पच्चले[5] सिरसा ।
भर-वास-पास-मुक्के साहू सव्वे नमंसामि ॥ १४ ॥
जीए कम-कमलं पाविऊण पावंति पाणिणो परमं ।
नाणं अन्नाणा वि हु सा जयइ सरस्सई देवी ॥ १५ ॥
जाण पसाएण पुण मएवि जड-बुद्धिणा कहा-करणे ।
लीलाए पयट्टिज्जइ, विसेसओ ते गुरू वंदे ॥ १६ ॥
इय पुज्ज-पणइ-करण-पणासियासेस-विग्घ-संघाओ ।
वोच्छं संवेगकरिं कहं तु सुरसुंदरिं नाम ॥ १७ ॥
अन्नं च, तस्स कीरइ पढमं चिय पत्थणा खल-जणस्स ।
बीहेइ कवि-जणो जस्स मूसओ इव बिरालस्स[6] ॥ १८ ॥
अहवा सहावउच्चिय दोस-ग्गहणम्मि वावड[7]-मणस्स ।
अब्भत्थणा-सएहि वि न खलस्स खलत्तणं गलइ ॥ १९ ॥
कुडिलत्तणं न उज्झइ परिच्छिद्द[8]-गवेसओ य दोजीहो ।
पत्थिज्जंतो वि कवीहिं दुज्जणो सप्प-सारिच्छो ॥ २० ॥
अब्भत्थिओ वि वंको कलुसिय-हियओ सुवित्त[9]-परिहीणो ।
चंदोव्व दुज्जणो इह दोसासंगे[10] पयासेइ ॥ २१ ॥
ललिए व निट्ठुरे वा कव्वे दोसो खलेहिं घेतव्वो ।
उट्ठ-मुहाओ अहवा नीहरइ[11] न जीरयं कहवि ॥ २२ ॥
दुज्जण-सहाए पडियं निम्मल-कव्वं पि लहइ न पइट्ठं ।
जल-बिंदुव्व सुतत्ते आयस-भाणम्मि[12] पक्खित्तो ॥ २३ ॥

---

१ सारङ्गः=सिंहः । २ ध्वान्तं = तिमिरम् । ३ A °सारच्छे° । ४ तल्लिप्सान् = तत्परान् । ५ प्रत्यलान्=समर्थान् । ६ B °लाइ । ७ प्रवृत्यते । ८ B विडाल° । ९ व्याकृतमनसः । १० परिच्छिद्रगवेषकः, सर्पपक्षे छिद्रं = बिलम्, दुर्जनपक्षे छिद्रं= दूषणम् । ११ चन्द्रपक्षे सुवृत्तं = शोभनकुण्डलाकारः, दुर्जनपक्षे सदाचारः । १२ चन्द्रपक्षे दोषाया रात्रेः स्वाङ्गे; दुर्जनपक्षे दोषाणां दूषणानामासङ्गे । १३ निस्सरति (H. P. IV. 79) B नीसर° । १४ भार्ण = भाजनम् (H. P. I. 267) ।

आसज्ज दुज्जणं कवि-जणस्स अब्भत्थणा तओ विहला ।
न हु सक्कर-रस-सित्तोवि चयइ कडुयत्तणं निंबो ॥ २४ ॥
अहवा कहा-पबंधो कीरइ किं दुज्जणाण संकाए ? ।
जूया-भएण [1]परिहेण-विमोयणं हंदि ! न हु जुत्तं ॥ २५ ॥
दुज्जण-असंमयं पि हु कुणइ कवी कव्वमेत्थ किमजुत्तं ? ।
उलुयाणमभासंतोवि दिणयरो किं न उग्गमइ ? ॥ २६ ॥
अपत्थिओवि सुयणो कईण कव्वे गुणे पयासेइ ।
धवलेइ [3]जयं सयलं सभावओ चेव निसि-नाहो ॥ २७ ॥
निंदा[4]कारि-जणस्स वि दोस-ग्गाही न सज्जणो कहवि ।
कुणइ सुयंधं वासिं [5]तच्छिज्जंतो वि मलयरुहो ॥ २८ ॥

अन्नं च ।

हवइ हु विरूवयंपि हु कव्वं सुयणाण संगमे [6]लट्ठं ।
सिं[7]प्पि-पुडम्मि पविट्ठं जलंपि मुत्ताहलं होइ ॥ २९ ॥
अब्भत्थणारिहा जं सुयणा, तो ते उ पत्थिमो इण्हिं ।
एगग्ग-मणा होउं [8]सोहिज्जंतिं निसामेह ॥ ३० ॥
घोरे [9]अणोरपारे संसारे जोणि-लक्ख-पउरम्मि ।
अइदुलहं लद्धूणं मणुयत्तं भविय-लोएण ॥ ३१ ॥
देविंद-चंद-नागिंद-विंद-[11]मणुइंद-वंदिय-जिणेहिं ।
[12]वज्जरिए उज्जमिउं जुत्तं धम्मम्मि सुद्धम्मि ॥ ३२ ॥
[13]सो अंतरारि-विजए राग-[14]दोसा[15] य अंतरा सत्तू ।
तव्विजए चिय सोक्खं तेहिं जियाणं पुणो दुक्खं ॥ ३३ ॥

एवं च ठिए ।

राग-[14]दोसा[15]णुगया जीवा [16]पावेंति विविह-दुक्खाइं ।
तम्हा तव्विजए चिय विबुहेहिं होइ जइयव्वं ॥ ३४ ॥
एयत्थ-साहण-परा सोलस-परिच्छेय-संगया ललिया ।
पाइय-गाहाहिं कहा कीरइ सुरसुंदरी-नामा ॥ ३५ ॥
अबुह-जण-बोहणं तह दुक्कह-लोयाण चित्त-रंजणयं ।
जुगवं णो सक्किज्जइ कवीहिं उभयंपि काऊण ॥ ३६ ॥

---

१ परिहणं=परिधानं = वस्त्रम् (H. D. VI. 21) । २ B °रिहाण। ३ जयं = जगत् । ४ B°कारज° । ५ तया वास्या छिद्यमानः । ६ लट्ठं श्रेष्ठम् (H. D. VII. 26) ७ शुक्ति-पुटे । ८ कथ्यमानाम् । ९ A °हिप्पंते । १० अण = नास्ति (H. P. II. 190) उरं = आरम्भः (H. D. I. 86) पारश्चान्तो यस्य तस्मिन्ननाद्यनन्ते इत्यर्थः । ११ मणुइंदा = मनुजेन्द्राः । १२ वज्जरिए = कथिते (H. P. IV. 2) । १३ सः = शुद्धधर्मः । १४ दोसो द्वेषः (H.D.V. 56) । १५ B पावंति ।

अओ ।

सालंकारेण घणक्खरेण रंजिज्जए जणो विबुहो ।
पयडत्थ-ललिय-कव्वं अबुहाणं बोहणं कुणइ ॥ ३७ ॥
दोण्ह वि [1]ऐक्कवए चिय सक्किज्जइ रंजणं न काऊणं ।
एक्कं गेण्हंताणं अवस्स किर नासए [2]बीयं ॥ ३८ ॥
निय-गुरु-कम-प्पसाया कावि हु सत्ती [3]उ जइवि मह अत्थि ।
[4]उवमा-सिलेस-रूवग-वण्णग-बहुलम्मि कव्वम्मि ॥ ३९ ॥
तहवि हु तयं न कीरइ असमत्थं [5]पत्थुअम्मि जं अत्थे ।
तो अबुह-बोहणत्थं पयडत्था कीरए एसा ॥ ४० ॥

किञ्च ।

सीसिणि-[6]मयहरियाए गुरु-भगिणीए अलंघ-वयणाए ।
सिरि-कल्लाणमईए पवत्तिणीए उ वयणेण ॥ ४१ ॥
पारद्धा जं एसा कवित्त-गव्वेण नो मए, तेण ।
कीरइ [7]उत्ताणत्था पाइय-गाहाहिं ललिय-पया ॥ ४२ ॥
हुं पज्जत्तं बहुणा पत्थुय-विग्घावहेण विहलेण ।
विहव-कुल-बालिया-कय-कडक्ख-विक्खेव-सरिसेणं ॥ ४३ ॥
निसुणह एगग्ग-मणा होउमियाणिं कहं कहिज्जंतं ।
[8]अड्ढाइज्ज-सएहिं गाहाणं कय-परिच्छेयं ॥ ४४ ॥

अत्थेत्थ सुवित्थिन्नो उड्ढाहो-लोग-[9]मज्झयारम्मि ।
नामेण तिरिय-लोगो [10]विबुहाणुगओ सुमेरुव्व ॥ ४५ ॥
दीवो उ अत्थि तत्थवि वित्थरओ जोयणाण लक्खं तु ।
जलहि-वलयावगूढो जंबुदीवो त्ति विक्खाओ ॥ ४६ ॥
तस्स य दाहिण-भागे भरहं नामेण अत्थि वर-खेत्तं ।
वेयड्ढ नग-वरेणं दुहा-विहत्तं सुवित्थिन्नं ॥ ४७ ॥
अह दाहिणड्ढ-भरहे गंगा-सिंधूण [11]मज्झयारम्मि ।
कप्प-दुमोव्व दुमाणं बहु-देसाणं पहाणयरो ॥ ४८ ॥
धन्न-समिद्धिल-पामर-रासय-संसद्द-पूरिय-दियंतो ।
अवि-करह-महिस-रासह-नाणाविह-[12]गोहणाइन्नो ॥ ४९ ॥

---

१ एकपदं=युगपत् । २ बीयं=द्वितीयम् । ३ B उ वि । ४ उपमा-श्लेष-रूपकादयोऽलङ्कारविशेषाः । ५ प्रस्तुते । ६ A °त्थुयम्मि । ७ मयहरिया महत्तरा (U.P.) । ८ उत्तानार्था=स्पष्टार्था । ९ अर्धतृतीयशतैः । १० मज्झयारं=मध्यम् (H. D. VI. 121) । ११ विबुधाः पण्डिताः, देवाश्च । १२ गोधनाकीर्णः ।

पइदियह-वहंताणेय-सारणी-विसर[1]रेहिरुज्जाणो ।
पुर-नगर-गाम-पउरो बहु-रिद्धि-समिद्ध-सयल-जणो ॥ ५० ॥
निच्चं पमुइय-लोओ नाणाविह-उच्छवेहिं अविरहिओ ।
भय-डमर-रहिय-गामो कुरुत्ति नामेण वर-देसो ॥ ५१ ॥[2]

अविय ।

अणवरय-वहंताणेय-वणिय-सत्थोह-[3]वसिम-सयल-पहो ।
जत्थ न नज्जइ पहि पहिं अडवि-वसि-ठाणय-विसेसो ॥ ५२ ॥
अन्नं च, तम्मि देसे गुणाण भवणम्मि एयमच्छरियं ।
[4]सोअ-रहिओवि जं सुणइ जणवओ लोय-भणियाइं ॥ ५३ ॥

अविय ।

जत्थ य गाम-[5]महल्ला कर-रहिया [6]धम्म-वज्जिया मुणिणो ।
देसस्स तस्स संवण्णणम्मि को उज्जमं कुणइ ? ॥ ५४[7]॥
तत्थवि य अत्थि वित्थिन्न-जलहि-वलयाणुकारि-परिहाए ।
पर-पुरिसालंघाए परिक्खित्तं [8]भमिर-मयराए ॥ ५५ ॥
पडिवक्ख-भयुप्पायण-विसाल-सालेण परिगयं रम्मं ।
रमणीय-मगर-तोरण-गोउर-दारेहिं परिकिन्नं ॥ ५६ ॥
अइनील-बहल-उववण-विरायमाणावसाण-भागेहिं ।
[9]मत्तालंब-गवक्खय-जुएहिं [10]वैर-चित्त-जुत्तेहिं ॥ ५७ ॥
नाणा-भूमि-जुएहिं पासाएहिं तुसार-धवलेहिं ।
तन्नयर-वासि-जण-[11]जस-थूहेहिव्व निच्चमइरम्मं ॥ ५८ ॥
तह अवरावर-देसागएण तन्नयर-वासिणा चेव ।
वणिय-कला-निउणेणं पइदियहं वणिय-लोएण ॥ ५९ ॥
[12]किज्जंत-वणिज्जेहिं विरायमाणं अणेग-हट्टेहिं ।
परिपूरिएहिं अंतो बहु-मुल्ल[13]-कियाणग-सएहिं ॥ ६० ॥
उत्तुंग-मगर-तोरण-पवणुद्धुय-धवल-[14]धय-वडड्ढेहिं ।
सुंदर-देव-उलेहिं उवसोहिय-सुंदर-पएसं ॥ ६१ ॥

---

१ रेहा=राजनं = शोभा (H.P.IV. 100) साऽस्ति येषां रेहिराणि (H. P. II. 159) । २ B चतसृभिः कलापकम् । ३ वसिमा वासवान् । ४ आश्चर्यम् । ५ सोओ=श्रोतः = श्रोत्रम्, शोकश्च । ६ महल्लो = वृद्धो निवहश्च (H. D. VI. 143) प्रथमेऽर्थे विरोधः, कर(हस्त)रहितानां महत्त्वबाधात्; द्वितीयेऽर्थे परिहारः, सर्वग्रामाणां कर(राजदेयभाग)वर्जितत्वात् । ७ धर्मः=पुण्यं, धनुश्च । ८ भमिरा भ्रमवन्तो मकरा यस्यां तया । ९ मत्तालम्बः प्राङ्गणावरणम् । १० B पायाररम्मेहिं । ११ थूहो = प्रासादशिखरं (H. D. V. 32.) । १२ क्रीयमाण-वाणिज्यैः । १३ B °ल्लग । १४ ध्वजपटाढ्यैः ।

तह [1]पंडु-पउम-संडोह-मंडियाणेय-गुरुतर-सरेहिं ।
सोवाण-पंति-सुगमावयार-वावी-सहस्सेहिं ॥ ६२ ॥
वर-तिय-चउक्क-चच्चर-आरामुज्जाण-दीहियाईहिं ।
देवाणमवि कुणंतं पए पए चित्त[2]-संहरणं ॥ ६३ ॥
सयलन्न-पुर-पहाणं नयरं सिरि-हत्थिणाउरं नाम ।
नयर-गुणेहुववेयं संकासं अमर-नयरस्स ॥ ६४ ॥[3]
जत्थ य निवसइ लोओ पियंवओ धम्म-करण-तल्लिच्छो ।
दक्खिन्न-चाय-भोगेहिं संगओ तह कला-कुसलो ॥ ६५ ॥
जत्थ य पुरम्मि निच्चं इओ तओ बहु-पओयण-परेण ।
भमिर-जण-समुदएणं दुस्संचाराओ रत्थाओ[4] ॥ ६६ ॥
जत्थ य कोडि-पडाया-पच्छाइय-सयल-गयण-मग्गम्मि ।
लोओ गिम्ह-दिणेसुवि रवि-कर-तावं न याणेइ ॥ ६७ ॥
जत्थ य पुरम्मि पुरिसा घर-भित्ति-निहित्त-मणि-मऊहेहिं ।
निच्चं हयंधयारे गयंपि रत्तिं[5] न याणंति ॥ ६८ ॥
रम्मत्तणओ जस्स य पलोयणत्थंव आगया देवा ।
कोउग[6]वक्खित्त-मणा अणिमिस-नयणत्तणं पत्ता ॥ ६९ ॥
धवल-हर-सिहर-विरइय-पवण-पहल्लंत[7]-वेजयंतीओ ।
सन्नंति[8] व रविणो संरहिस्स अइउच्च-गमणट्ठा ॥ ७० ॥
जत्थ य पुरम्मि दीसइ पाय-पहारो उ रंग-भूमीसु ।
दंडो उ धय-वडाणं सीस-च्छेओ जुयारीण[9] ॥ ७१ ॥
कुसुमाण सिरसिं बंधो साग-च्छेत्तेसु जीव-कत्तणया ।
तह पंडिय-परिसासुं पत्ताणं[10] हंदि ! भिंदणाया[11] ॥ ७२ ॥
अह एक्को चिय दोसो गुणाण भवणम्मि तम्मि नयरम्मि ।
निद्दोस-साहुणो जं सयावि दीसंति गुत्ति[12]-ठिया ॥ ७३ ॥
अह तम्मि पुरम्मि पहू[13] पभूय-करि-तुरय-रयण-भंडारो ।
जह-भणिय-नीइ-पालण-आणंदिय-सयल-जण-चित्तो ॥ ७४ ॥
निय-बुद्धि-समुदएणं वसीकयासेस-सत्तु-संताणो ।
संपूरियत्थि-समुदय-मण-पत्थिय-अत्थ-वित्थारो ॥ ७५ ॥

---

१ B पडु । २ B °त्तहरणं च । ३ B दशभिः कुलकम् । ४ रथ्या = राजमार्गः । ५ रात्रिम् । ६ कौतुकावक्षिप्तमनसः । ७ पहल्लंती=घूर्णयमाना (H. P. IV. 117) विचलन्तीत्यर्थः । ८ संज्ञां कुर्वन्तीव । ९ जुयारी = धान्यविशेषः । १० पत्तं = पात्रं पत्रं च । ११ A °णयं । १२ गुप्तिः=कारागृहम्, मनो-वाक्-कायसंयमनरूपः साधोराचारश्च । १३ प्रभुः = स्वामी राजेत्यर्थः ।

दढ-काढिण-भुया-ऽपरिमिय-परक्कम-क्कंत-सयल-पडिवक्खो ।
पडिवक्ख-भामिणी-वयण-नलिण-संकोयण-मेयंको ॥ ७६ ॥
सूरोव्व पिहु-पयावो सीहो इव अकय-पर-बलासंको ।
उयहिव्व सुगंभीरो चंदो इव जण-मणाणंदो ॥ ७७ ॥
रूवेण कामदेवो बुद्धीए सुर-गुरुस्स सारिच्छो ।
निवसइ पमोय-पत्तो राया सिरि-अमरकेउत्ति ॥ ७८ ॥
तस्स य ति-वग्ग-सारं रज्ज-सिरिं सम्ममणुहवंतस्स ।
वच्चंति वासराइं इंदस्स व देव-लोगम्मि ॥ ७९ ॥
अह अन्नया कयाइवि अत्थाण-गयस्स राइणो तस्स ।
विणय-पणउत्तमंगो पडिहारो बंधुलो भणइ ॥ ८० ॥
देव ! कुसग्गपुराओ चित्तग्गरो चित्त-कम्म-पत्तट्ठो ।
नामेण चित्तसेणो समागतो चिट्ठइ दुवारे ॥ ८१ ॥
सो देव-पाय-दंसण-सुह-कंखी इच्छए इह पवेसं ।
एवं च ठिए अम्हं देवाएसो पमाणंति ॥ ८२ ॥
तत्तो रण्णा भणियं लहुं पवेसेहि, ताहे सो विहिणा ।
अत्थाणम्मि पविट्ठो कय-विणओ राइणो पुरओ ॥ ८३ ॥
उवविट्ठो भूमीए रन्ना भणिओ कुओऽसि तं भद्द ! ? ।
केण व कज्जेण इहं समागओ मह समीवम्मि ? ॥ ८४ ॥
तो भणइ चित्तसेणो कुसग्गनयराउ आगओ देव ! ।
चित्तगरो साइसयं जाणामि य चित्त-कम्ममहं ॥ ८५ ॥
चित्त-प्पिओ य देवो सुम्मइ वत्तासुं तेण अहमेत्थ ।
चित्त-कलं पयडेउं समागओ देव-पासम्मि ॥ ८६ ॥
तत्तो रन्ना भणियं केरिसयं चित्त-कोसलं तुज्झ ? ।
दंसेहि ताव मज्झं आलिहियं किंचि वेर-रूवं ॥ ८७ ॥
अह तेण कक्ख-देसम्मि गोविया चित्त-पट्टिया सहसा ।
पयडीकाउं रण्णो समप्पिया हिट्ठ-वयणेण ॥ ८८ ॥
पसरंत-पयड-पुलओ राया पुलोएइ तत्थ आलिहियं ।
नाणा-वन्नय-कलियं पमाण-रेहाहिं सुविसुद्धं ॥ ८९ ॥
अहिणव-जोव्वण-वर-रूव-जुत्तमचंत-मणहरागारं ।
अहिणव-सिहिणारंभं कण्णाए रूवयं पवरं ॥ ९० ॥

---

१ A कामि° । २ A मियं° । ३ B पञ्चभिः कलापकम् । ४ आस्थानं-सभा । ५ पत्तट्ठो = बहुशिक्षितः (H.D. VI. 68) । ६ B भद्द तुम । ७ श्रूयते । ८ प्रकटयितुम् । ९ A °हिउं । १० B रूवंति । ११ पश्यति (H. P. IV. 181.) । १२ सिहिणो = स्तनः (H. D. VIII. 31) । १३ B युग्मं ।

तं दट्ठुं नर-नाहो चिंतइ एसो हु चित्त-कम्मम्मि ।
अइकुसलो जं लिहियं [1]अउव्व-रूवं इमं रूवं ॥ ९१ ॥
ति-लोक्कम्मिवि मन्ने एरिस-रूवा न इत्थिया अत्थि ।
चित्त-कला-निउणत्ता [2]अदिट्ठ-रूवा इमा लिहिया ॥ ९२ ॥
जइ पुण कत्थवि होज्जा एरिस-रूवेण इत्थिया कन्ना ।
तीए वि संगमो जइ ता रज्जं होज्ज सकयत्थं ॥ ९३ ॥
एवं चिंतेंतस्स य [3]वेम्मह-सर-गोयरम्मि पडियस्स ।
[4]वीसरिओ से अप्पा चित्तेऽवक्खित्त-चित्तस्स ॥ ९४ ॥
तत्तो खणंतराओ संमीलिय-लोयणो अमरकेऊ ।
सीहासणाउ पडिओ मुच्छाए परवसो सहसा ॥ ९५ ॥
हा ! हा ! हत्ति भणंता अत्थाण-गया समुट्ठिया लोया ।
वीयंति वीयणेहिं सीयल-सलिलेण सिंचंति ॥ ९६ ॥
वयणे खिवंति खिप्पं कप्पूरं तह मलेंति अंगाइं ।
तं दट्ठुं चित्तसेणो पहसिय-वयणो दढं जाओ ॥ ९७ ॥
रे ! रे ! कोवि हु पावो [5]अहिमर-रूवेण आगओ एसो ।
कम्मणगारी जेणिह विमोहिओ अम्ह सामित्ति ॥ ९८ ॥
ताहेह हणह बंधह एवं भणंतेहिं अंगरक्खेहिं ।
गहिओ सो [6]हम्मंतो एवं भणिउं [7]समाढत्तो ॥ ९९ ॥
भो ! भो ! भद्दा ! नाहं दुट्ठो ता मा मुहा [8]कंयत्थेह ।
तत्तो य तेहिं भणियं कहं न दुट्ठो तुमं पाव ! ? ॥ १०० ॥
कम्मण-कयं हि चित्तं [9]पयंसियं कीस राइणो तुमए ? ।
तह मुच्छियम्मि देवे वियसिय-वयणो य [10]किं जाओ ? ॥ १०१ ॥
ता कहसु केण रण्णो वहणत्थं पेसिओ तुमं पाव ! ? ।
तो भणइ चित्तसेणो [11]अक्खिस्सं तुम्ह सव्वंपि ॥ १०२ ॥
रन्नो अब्भुदयत्थं समागओ न उण दुट्ठ-बुद्धीए ।
[12]एमाइ भणंतोवि हु बद्धो सो राय-पुरिसेहिं ॥ १०३ ॥
एत्थंतरम्मि राया गय-मुच्छो [13]सत्थ-चेयणो जाओ ।
अह नरवइणा भणियं मुंचह भो ! चित्तगरमेयं ॥ १०४ ॥
उच्छोडिय-बंधो सो रन्ना भणिओ य भद्द ! उवविससु ।
आइक्खसु मह सच्चं केण तुमं पेसिओ एत्थ ? ॥ १०५ ॥

---

१ अपूर्वरूपम् । २ वम्महो = मन्मथः । ३ विस्मरितः । ४ अभिमरो घनादिलोभतो मरणभयरहितं साहसकर्मकारी । ५ हम्मंतो = हन्यमानः । ६ समाढत्तो = समारब्धः (H. P. II. 138) । ७ कदर्थयत । ८ प्रदर्शितम् । ९ आख्यास्यामि । १० एवमादि । ११ स्वस्थचेतनः ।

तो भणइ चित्तसेणो निसुणसु नर-नाह ! एत्थ परमत्थं ।
चित्तगर-वेस-धारी समागओ जेण अहमेत्थ ॥ १०६ ॥
अत्थेत्थ कुसग्गपुरं सुपासिद्धं चेव देव-पायाणं ।
नयर-गुणेहुवचेयं धण-धन्न-समिद्ध-जण-कलियं ॥ १०७ ॥
पणइ-जण-पूरियासो रायां घणवाहणोत्ति तत्थासि ।
पाणप्पिया से देवी वसन्तसेणत्ति नामेण ॥ १०८ ॥
ताण य पुत्तो नरवाहणोत्ति नामेण उक्कड-पयावो ।
कमलावइत्ति-नामा धूया अचंत-रूववई ॥ १०९ ॥
अह अन्नया य राया दाउं नरवाहणस्स निय-रज्जं ।
कमलावई य भगिणी अणुरूव-वरस्स दायव्वा ॥ ११० ॥
इय भणिऊण पुत्तं सुगुरु-समीवम्मि जाय-संवेगो ।
संसारुच्छेयकरं सामन्नं उवगओ विहिणा ॥ १११ ॥
नरवाहणोवि राया रज्जं पालेइ पणय-पडिवक्खं ।
चिट्ठइ कन्तंतेउर-मज्झे कमलावई वि सुहं ॥ ११२ ॥
एत्तो य तम्मि नयरे निवसइ वणिओ उ सागरो नाम ।
रन्नो बाल-वयंसो जिण-वयणे गाढमणुरत्तो ॥ ११३ ॥
सिरिमइ-नामा भज्जा अइप्पिया तस्स सील-संपन्ना ।
सिरिदत्तो से पुत्तो सिरिकंता तहयं दुहियत्ति ॥ ११४ ॥
सिरिकंता अणुदियहं वच्चई कमलावईए पासम्मि ।
जाया य गरुय-पीई अन्नोन्नं ताण दोण्हंपि ॥ ११५ ॥
इत्थी-जण-जोगाओ गहियाओ कलाओ बाल-भावेवि ।
सगल-कला-निउणस्स उ पासम्मि सुमित्तसेणस्स ॥ ११६ ॥
राय-दुहियाए समयं चित्ताईयाहि विविह-कीलाहिं ।
सिरिकंता कीलेत्ता विगाल-समयम्मि एइ गिहं ॥ ११७ ॥
सिरिकंताए समयं सिणेह-साराए राय-धूयाए ।
वोलीणो बहु-कालो नाणाविह-कीडण-रयाए ॥ ११८ ॥
कमसो वड्ढंतीओ तियसाण वि पत्थणिज्ज-रूवाओ ।
पत्ताओ पढम-जोव्वणमणंग-सिंगार-आवासं ॥ ११९ ॥
अह अन्नया य राया मइसागर-सागरेहि संजुत्तो ।
अत्थाण-मंडवम्मी आसीणो अच्छई जाव ॥ १२० ॥

---

१ प्रणयिजनः = अर्थिसमुदयः । २ धूया = दुहिता = पुत्री । ३ A °रूयव° ।
४ बालवयस्यो बालमित्रम् । ५ B नामओ । ६ अतिक्रान्तः । ७ आस्ते ।

निय-सहि-यण-संजुत्ता ताव य कमलावई तहिं आया ।
भूसण-पसाहिअंगी [1]गेंदुय-कीलाए कीलंती ॥ १२१ ॥
अह सा भगिणी रन्ना पीईए निवेसिया [2]निउच्छंगे ।
तत्तो दट्ठुं तीए रूवं तह जोव्वणमुदग्गं ॥ १२२ ॥
भणिओ रन्ना मंती मइसागर ! [3]तइय पव्वयंतेण ।
ताएण अहं भणिओ भगिणी ठाणम्मि दायव्वा ॥ १२३ ॥
[4]इंहिं वरस्स उचिया जाया एसत्ति, ता महं कहसु ।
को अणुरूवो पुरिसो [5]इमीए सुकुल-प्पसूओ य ? ॥ १२४ ॥
मइसागरेण भणियं देवो च्चिय एत्थ जाणए उचियं ।
तत्तो रन्ना भणियं एवं मे फुरई चित्तम्मि ॥ १२५ ॥
कीरइ सयंवरो इह हक्कारिज्जंतु सव्व-रायाणो ।
जो चेव हियय-इट्ठो तं चेव वरेई जेणेसा ॥ १२६ ॥
मइसागरेण भणियं जं देवो आणवेइ तं किच्चं ।
[6]नवरि सयंवर-करणं संपइ उचियं न काउं जे [7] ॥ १२७ ॥
सव्वेवि निवा जइया आयत्ता होंति एग-नरवइणो ।
तदणुन्नाएण तया सयंवरो होइ कायव्वो ॥ १२८ ॥
एगस्स जओ वरणे सेसाणं सो निवारगो होइ ।
संपइ पुण राय[8]णो नरिंद ! सव्वेवि अहमिंदा ॥ १२९ ॥
ता ताणमेग-वरणे सेसा सव्वेवि सत्तुणो होंति ।
न य सक्का संगामे जिणिउं सव्वेवि एगेण ॥ १३० ॥
ता अलमिमिणा नर-वर ! विग्गह-मूलेण[9]णत्थ-बहुलेण ।
कमलावई-सयंवर-करणेण एत्थ पत्थावे ॥ १३१ ॥
तत्तो रण्णा भणियं कस्सेसा [10]तीरिहि भद्द ! दायव्वा ।
को व इमीए इट्ठो मणस्स इइ कह णु नायव्वं ? ॥ १३२ ॥
जस्स व तस्स व रन्नो दायव्वा न य मए नियय-भगिणी ।
दिन्ना होइ सुदिन्ना जस्स, इमा तस्स दायव्वा ॥ १३३ ॥
एवं च जाव जंपइ राया मइसागरेण सह तत्थ ।
ताव य दुवार[11]पालो पणाम-पच्चुट्ठिओ भणइ ॥ १३४ ॥
अट्ठंग-निमित्त-विऊ भूय-भविस्सत्थ-पयड[12]ण-पंडिट्ठो ।
सुमई-नामो इहइं समागओ देव ! नेमित्ती ॥ १३५ ॥

---

१ B कंदु°। २ निउच्छंगे=निजोत्सङ्गे । ३ तदा प्रव्रजता=दीक्षां गृह्णता । ४ B इंहिं । ५ B °मीइ । ६ आनन्तर्येऽव्ययम् (H. P. II. 188) । ७ पादपूरणेऽव्ययमिदम् (H. P. II. 217) । ८ यदा । ९ A °न्नायम्मि तओ । १० अनर्थबहुलेन । ११ B तरिहि; तहिं । १२ A °रयालो । १३ पटिष्ठः=चतुरः ।

सो देव-दंसणत्थं दुवार-देसम्मि चिट्ठइ इयाणिं ।
इय सोउं नर-वइणा भणियं तुरियं पवेसेहिं ॥ १३६ ॥
तयणंतरं च सुमई निम्मल-सिय-वसण-सोहिय-सरीरो ।
गोरोयण-कय-तिलओ समागओ राइणो पुरओ ॥ १३७ ॥
आसी-पयाण-पुव्वं दाउं दुव्वक्खए[2] नरिंदस्स ।
रन्ना कओवयारो उचियासणगम्मि उवविट्ठो ॥ १३८ ॥
रन्ना पच्चय-हेउं अतीय-वत्थुम्मि पुच्छिओ एसो ।
पच्चक्खं पिव सव्वं साहेइ सो अवितहं[3] जाव ॥ १३९ ॥
ताहे पहसिय-वयणो राया नरवाहणो इमं भणति ।
भो सुमइ ! मज्झ भगिणी एसा कमलावई कण्णा ॥ १४० ॥
एईए को भत्ता होही मण-वल्लहत्ति वज्जरसु ।
सुमई निरूविऊणं निमित्तमेवं समुल्लवइ ॥ १४१ ॥
नर-वर ! चित्ते लिहियं एईए[4] रूवयं पुलोएत्ता ।
मुच्छिज्जिस्सइ जो इह होही भत्ता इमीए सो ॥ १४२ ॥
सयलोरोहे[5]-पहाणा तस्स य होही इमा महादेवी ।
एत्थत्थे य नरेसर ! मा काहिसि अन्नहाभावं ॥ १४३ ॥
एत्थंतरम्मि सागर-सेट्ठी संलवइ सुमइ-नेमित्तिं ।
सिरिकंताए भत्ता को होही मज्झ धूयाए ? ॥ १४४ ॥
वज्जरइ तओ सुमई कसिण-भुयंगेण डंसियमेयं जो ।
उज्जीविस्सइ सो चिय भत्ता धूयाए ते होही ॥ १४५ ॥
एवं च पुच्छिऊणं उचियं काऊण तस्स उवयारं ।
पट्ठविओ नर-वइणा जहागयं पडिगओ सुमई[6] ॥ १४६ ॥
तत्तो य भणइ मंती सोहणमहुणा नरिंद ! संजायं ।
ता इण्हिं तब्भणिए कायव्वो उज्जमो होइ ॥ १४७ ॥
भणियं रन्ना को इह सांइसयं लिहइ चित्त-कम्मंति ।
मइसागरेण भणियं सुपसिद्धो ताव इह नयरे ॥ १४८ ॥
एक्को चिय कमलावइ-उज्झाय-सुमित्तसेण-नामस्स ।
तणओ उ चित्तसेणो अइकुसलो चित्त-कम्मम्मि ॥ १४९ ॥[9]
रन्ना भणियं सिग्घं वाहरह तयंति तक्खणेण अहं ।
वाहरिओ संपत्तो भणिओ रन्ना सबहु-माणं ॥ १५० ॥

---

१ आशीःप्रदानपूर्वम् । २ दूतावीक्षतान् । ३ अवितथम्=सत्यम् । ४ B रूवं एईइ पिक्खिऊण निवो । ५ अवरोधः=अन्तःपुरम् । ६ कसिणो=कृष्णः । ७ दष्टाम् । ८ अस्थापितः । ९ B युग्मम् ।

कवलावईए रूवं सिग्घं आलिहसु चित्त-फलहीए ।
जं [1]आणवेसि, भणिउं सोहण-वन्नेहि तं लिहियं ॥ १५१ ॥
[2]देक्खालियं च रन्नो साइसयं पेक्खिऊण सो तुट्ठो ।
भणिओ य अहं रन्ना एत्थत्थे [3]तं सि [4]उचिउत्ति ॥ १५२ ॥
चित्तगर-वेसधारी एयं घेत्तूण सव्व-राईणं ।
दंसेसु, जस्स मुच्छा जायइ एयं पुलोएउं [5] ॥ १५३ ॥
सो मह साहेअव्वो सिग्घं आगम्म, जेण तस्सेव ।
महया उवयारेण दिज्जइ कमलावई एसा ॥ १५४ ॥[6]
एवं रण्णा भणिओ तत्तो पणमित्तु तस्स पय-कमलं ।
कइवय-परियण-सहिओ कुसग्गनयराउ [7]नीहरिओ ॥ १५५ ॥
सुग्गीव-कित्तिवद्धण-पमुहाणं नरवईण मे एसा ।
संदंसिया उ, न पुणो जाया इह अत्थ-संसिद्धी ॥ १५६ ॥
अज्ज पुणो इह नयरे समागओ देव ! तुम्ह पासम्मि ।
एयं नियच्छिऊणं मुच्छा जाया य तुम्हाणं ॥ १५७ ॥
जायं मह सामि-समीहियं ति चिंतित्तु तेण नर-नाह ! ।
जाओ हरिसो मज्झं [8]सुमरिय नेमित्तियं वयणं ॥ १५८ ॥
एएण कारणेणं मुच्छाए तुम्ह हरिसिओ अहयं ।
ता मा नरिंद ! अन्नह-भावेण वियप्पसु ममंति ॥ १५९ ॥
इइ चित्तसेण-वयणं सोऊणं विगय-अन्न-आसंको ।
वज्जरइ अमरकेऊ [9]विम्हइओ चित्त-रूवेण ॥ १६० ॥
किं तीए कन्नाए एरिसयं अत्थि रूव-सोहग्गं ? ।
ता भणई चित्तसेणो निमेसमेत्तं इमं लिहियं ॥ १६१ ॥
को सक्कइ कुसलोवि हु [10]जंहट्ठियं तीए राय-कन्नाए ।
निज्जिय-तियस-विलासिणि-रूवं रूवं समालिहिउं ? ॥ १६२ ॥
तव्वयणं सोऊणं हरिसिय-हियएण राइणा तस्स ।
अंग-विलग्गमसेसं पसाइयं कडय-वत्थाइं ॥ १६३ ॥
तो भणइ चित्तसेणो आएसं देह देव ! अम्हाणं ।
नरवाहणस्स रण्णो [11]जंहट्ठियं जेण सोहेमो ॥ १६४ ॥
रण्णण्णुन्नाओ सो कमेण पत्तो कुसग्गनयरम्मि ।
नरवाहणस्स रन्नो सिट्ठो सव्वोवि वुत्तंतो ॥ १६५ ॥

---

१ आज्ञपयसि । २ दर्शितं (H. P. IV. 181) । ३ त्वम् । ४ असि । ५ दृष्ट्वा (H. P. IV. 181) । ६ B युग्मम् । ७ निःसृतः (H. P. IV. 79) । ८ स्मृत्वा । ९ विस्मितः । १० यथ स्थितम् । ११ कथयामः (H. P. IV. 2) ।

अह तेणवि निय-भगिणी पभूय-धण-परियणेण परियरिया ।
पट्ठविया हिट्ठेणं सयंवरा अमरकेउस्स ॥ १६६ ॥
सिरिकंताइ-सहि-जणं आभासित्ता य सयल-परिवारं ।
कमलावईवि चलिया हरिस-विसायाउरा हियए ॥ १६७ ॥
इच्छिय-वर-लाभेणं साणंदा तहय बंधु-विरहेणं ।
किंचि-ससोगा पत्ता कमेण सा हत्थिणपुरम्मि ॥ १६८ ॥
